GOVERNMENT OF TAMILNADU

संस्कृतरञ्जनी

SANSKRIT READER

IX STD

" सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै "

Department of School Education

Untouchability is Inhuman and a Crime

IX Perface.indd 1 11/06/18 4:14 PM

Government of Tamil Nadu

First Edition - 2018

Reprint - 2019, 2020, 2021, 2022, 2023, 2024

(Published under new syllabus)

Content Creation

State Council of Educational Research and Training

© SCERT 2018

Printing & Publishing

Tamil NaduTextbook and Educational Services Corporation

www.textbooksonline.tn.nic.in

IX Perface.indd 2 11/06/18 4:14 PM

आमुखम् - Preface

नवमकक्ष्यायाः कृते प्रकल्पितमिदं पाठ्यपुस्तकं गद्यं, पद्यं व्याकरणमितिभागत्रययुक्तं भवति। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः ।।

IX Perface.indd 3 11/06/18 4:14 PM

देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः

IX Perface.indd 4 11/06/18 4:14 PM

तमिळ् ताय् वाळ्त्तु - Tamil Thai Valzthu

नीरारुङ्कडलुडुत्त निलमडन्दैक्केलिलोलुगुं
सीरारुं वदनमेनत्तिकल्भरत खण्डमिदिल्
तेक्कणमुं अदिर्चिरन्त द्राविडनल् तिरुनाडुं
तक्कसिरुपिरैनुदलुं धरित्तनरुं तिलकमुमे
अत्तिलकवासनैपोल् अनैत्तुलगुं इन्बमुर
एत्तिशैयुं पुगळमणक्क इरुन्दपेरुन्तमिलणङ्गे
तमिलणङ्गे
उन्सीरिळमैत्तिरं वियन्दु सेयल्मरन्दु वाळ्त्तुदुमे
वाळ्त्तुदुमे
वाळ्त्तुदुमे !

- मनोन्मणीयं पे. सुन्दरं पिल्लै

IX Perface.indd 5 11/06/18 4:14 PM

राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ।। ।।1।।

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ।। ।।2।।

प्रतिज्ञा - Pledge

भारतभूमिः मे माता। भारतीयाः सर्वे मम भ्रातरः भगिन्यश्च। भारतवर्षे मम मनः स्निह्यति। विविधे समृद्धे च भारतीये कलाचारे अहं गर्वमुद्वहामि। एतं योग्यं भवितुं सर्वदा यतेय। पितॄन् गुरून् वृद्धांश्चापि सर्वान् सादरं पूजयेयम्। सर्वस्मिन्नपि जने सादरं व्यवहरेयम्। मदीयाय देशाय देशीयेभ्यः मदीयेभ्यश्च मम प्रीतिं प्रतिजाने। तेषां योगक्षेमावेव मे आनन्दहेतुः, नान्यः।।

IX Perface.indd 6 11/06/18 4:14 PM

SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

OBJECTIVES:-

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 9 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.

IX Perface.indd 7 11/06/18 4:14 PM

"Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitaliry and power."

– Mahatma Gandhiji

"The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language."

– Pandit Jawaharlal Nehru

"Sanskrit is the most suitable language that could be made the official language."

– Dr. Ambedkar

"I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only."

- Dr. S. Radhakrishnan

IX Perface.indd 8 11/06/18 4:14 PM

मङ्गलाचरणम्

ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः

इन्द्रं यमं मातरिश्वानमाहुः ।

वेदान्तिनोऽनिर्वचनीयमेकं

यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।

शैवा यमीशं शिव इत्यवोचन्

यं वैष्णवा विष्णुरिति स्तुवन्ति ।

बुद्धस्तथार्हन्निति बौद्धजैनाः

सच्छ्री अकालेति च सिक्कसन्तः।। ।।2।।

शास्तेति केचित् कतिचित् कुमारः

स्वामीति मातेति पितेति भक्त्या

यं प्रार्थयन्ते जगदीशितारं

स एक एव प्रभुरद्वितीयः ।। ।।3।।

IX Perface.indd 9 11/06/18 4:14 PM

विषयसूची – (INDEX)

भागः (Unit)	विषयः (Topic)	पृष्ठसंख्या (Page No.)
भाषापरिचयः	अक्षरस्मृतिः	XI
1. पद्यम्	द्रविडामृतम्	01
गद्यम्	स्मरणीयाः भारतदेशीयाः	05
व्याकरणम्	अजन्तपुल्लिङ्गशब्दाः,	08
2. पद्यम्	अमृतवाणी	10
गद्यम्	संस्कृतमहिमा	16
व्याकरणम्	धातुः-आत्मनेपदी-लट्	22
3. पद्यम्	सुभाषितानि	24
गद्यम्	शुकनासोपदेशः	32
व्याकरणम्	अजन्तस्त्रीलिङ्गशब्दाः	36
4. पद्यम्	वैदिकविज्ञानम्	39
गद्यम्	सुन्दरभारतम्	43
व्याकरणम्	धातुः-आत्मनेपदी-लङ्	48
5. पद्यम्	दूतलक्षणम्	50
गद्यम्	हेमन्तवर्णनम्	54
व्याकरण-अभ्यासः	अजन्तनपुंसकलिङ्गशब्दाः	60
6. पद्यम्	लोकविज्ञानम्	63
गद्यम्	तत् त्वम् असि	67
व्याकरण-अभ्यासः	धातुः-आत्मनेपदी-लृट्	71

IX Perface.indd 10 11/06/18 4:14 PM

भाषापरिचयः

अक्षरस्मृतिः



(i) स्वराः (Vowels)

स्वराः - यस्य वर्णस्य उच्चारणे अपरस्य वर्णस्य सहायता नापेक्षिता, तस्य स्वरः इति नाम।

यथा -

अ आ इ ई उ ऊ ऋ ॠ

ऌ ए ऐ ओ औ अं अः



ह्रस्वस्वराः (Short Vowels)

अ इ उ ऋ ऌ

दीर्घस्वराः (Long Vowels)

आ ई ऊ ॠ ए ऐ ओ औ

IX Perface.indd 12 11/06/18 4:14 PM

(ii) हलः (व्यञ्जनानि) Consonants

व्यञ्जनानि – यस्य वर्णस्य उच्चारणे स्वरवर्णस्य सहायता अपेक्षिता तस्य हलः इति नाम।

कवर्गः	-	क	ख	ग	घ	ङ
चवर्गः	-	च	छ	ज	झ	ञ
टवर्गः	-	ट	ठ	ड	ढ	ण
तवर्गः	-	त	थ	द	ध	न
पवर्गः	-	प	फ	ब	भ	म
अन्तस्थाः	-	य	र	ल	व	
ऊष्माणः	-	श	ष	स	ह	

(iii) स्वरयुक्तव्यञ्जनाक्षराणि (Compound letters)

क् + अ = क	ख्+ अ = ख	ग्+ अ = ग	घ्+ अ = घ	ङ्+ अ = ङ
च्+ अ = च	छ्+ अ = छ	ज्+ अ = ज	झ्+ अ = झ	ञ्+ अ =ञ
ट्+ अ = ट	ठ्+ अ = ठ	ड्+ अ = ड	ढ्+ अ = ढ	ण्+ अ =ण
त्+ अ = त	थ्+ अ = थ	द्+ अ = द	ध्+ अ = ध	न्+ अ =न
प्+ अ = प	फ्+ अ = फ	ब्+ अ = ब	भ्+ अ = भ	म्+ अ =म
य् + अ = य	र्+ अ = र	ल्+ अ = ल	व्+ अ = व	श्+ अ =श
ष्+ अ = ष	स्+ अ = स	ह्+ अ = ह		

IX Perface.indd 13 11/06/18 4:14 PM

क	का	कि	की	कु	कू	कृ	कॄ	कॢ	के	कै	को	कौ	कं	कः
ख	खा	खि	खी	खु	कू	कृ	खॄ	खॢ	खे	खै	खो	खौ	खं	खः
ग	गा	गि	गी	गु	गू	गृ	गॄ	गॢ	गे	गै	गो	गौ	गं	गः
घ	घा	घि	घी	घु	घू	घृ	घॄ	घॢ	घे	घै	घो	घौ	घं	घः
ङ	ङा	ङि	ङी	ङु	ङू	ङृ	ङॄ	ङॢ	ङे	ङै	ङो	ङौ	ङं	ङः
च	चा	चि	ची	चु	चू	चृ	चॄ	चॢ	चे	चै	चो	चौ	चं	चः
छ	छा	छि	छी	छु	छू	छृ	छॄ	छॢ	छे	छै	छो	छौ	छं	छः
ज	जा	जि	जी	जु	जू	जृ	जॄ	जॢ	जे	जै	जो	जौ	जं	जः
झ	झा	झि	झी	झु	झू	झृ	झॄ	झॢ	झे	झै	झो	झौ	झं	झः
ञ	ञा	ञि	ञी	ञु	ञू	ञृ	ञॄ	ञॢ	ञे	ञै	ञो	ञौ	ञं	ञः
ट	टा	टि	टी	टु	टू	टृ	टॄ	टॢ	टे	टै	टो	टौ	टं	टः
ठ	ठा	ठि	ठी	ठु	ठू	ठृ	ठॄ	ठॢ	ठे	ठै	ठो	ठौ	ठं	ठः
ड	डा	डि	डी	डु	डे	डृ	डॄ	डॢ	डे	डै	डो	डौ	डं	डः
ढ	ढा	ढि	ढी	ढु	ढे	ढृ	ढॄ	ढॢ	ढे	ढै	ढो	ढौ	ढं	ढः
ण	णा	णि	णी	णु	णू	णृ	णॄ	णॢ	णे	णै	णो	णौ	णं	णः
त	ता	ति	ती	तु	तू	तृ	तॄ	तॢ	ते	तै	तो	तौ	तं	तः
थ	था	थि	थी	थु	थु	थृ	थॄ	थॢ	थे	थै	थो	थौ	थं	थः
द	दा	दि	दी	दु	दू	दृ	दॄ	दॢ	दे	दै	दो	दौ	दं	दः
ध	धा	धि	धी	धु	धू	धृ	धॄ	धॢ	धे	धै	धो	धौ	धं	धः
न	ना	नि	नी	नु	नू	नृ	नॄ	नॢ	ने	नै	नो	नौ	नं	नः
प	पा	पि	पी	पु	पू	पृ	पॄ	पॢ	पे	पै	पो	पौ	पं	पः
फ	फा	फि	फी	फु	फू	फृ	फॄ	फॢ	फे	फै	फो	फौ	फं	फः
ब	बा	बि	बी	बु	बू	बृ	बॄ	बॢ	बे	बै	बो	बो	बं	बः
भ	भा	भि	भी	भु	भू	भृ	भॄ	भॢ	भे	भै	भो	भौ	भं	भः
म	मा	मि	मी	मु	मू	मृ	मॄ	मॢ	मे	मै	मो	मौ	मं	मः
य	या	यि	यी	यु	यू	यृ	-	यॢ	ये	यै	यो	यौ	यं	यः
र	रा	रि	री	रु	रू	-	-	-	रे	रै	रो	रौ	रं	रः
ल	ला	लि	ली	लु	लू	लृ	-	लॢ	ले	लै	लो	लौ	लं	लः
व	वा	वि	वी	वु	वू	वृ	वॄ	वॢ	वे	वै	वो	वौ	वं	वः
श	शा	शि	शी	शु	शू	शृ	शॄ	शॢ	शे	शै	शो	शौ	शं	शः
ष	षा	षि	षी	षु	षू	षृ	षॄ	षॢ	षे	षै	षो	षौ	षं	षः
स	सा	सि	सी	सु	सू	सृ	सॄ	सॢ	से	सै	सो	सौ	सं	सः
ह	हा	हि	ही	हु	हू	हृ	हॄ	हॢ	हे	है	हो	हौ	हं	हः

IX Perface.indd 14 11/06/18 4:14 PM

(iv) संयुक्ताक्षराणि
Conjunct Consonants

क्

क् + क= क्क

क् + त= क्त

क् + य= क्य

क् + र= क्र

क् + ष= क्ष

क् + व= क्व

ख्

ख्+ य= ख्य

ग्

ग्+ म= ग्म

ग्+ न= ग्न

ग्+ र = ग्र

घ्

घ्+ म= घ्म

घ्+ न= घ्न

घ् + य= घ्य

घ् + र= घ्र

च्

च्+ च= च्च

च्+ छ= च्छ

च्+ न= च्न

च्+ म= च्म

च्+ र= च्र

ज्

ज्+ ज= ज्ज

ज्+ न= ज्न

ज्+ म= ज्म

ज्+ य = ज्य

ज्+ र = ज्र

ज् + ञ= ज्ञ

ट्

ट्+ ट= ट्ट

ट्+ य = ट्य

ट्+ र= ट्र

ठ्

ठ्+ य = ठ्य

ड्

ड्+ ड= ड्ड

ड्+ य = ड्य

ड्+ र= ड्र

ण्

ण्+ क= ण्क

ण्+ ड= ण्ड

ण्+ ण= ण्ण

त्

त्+ क= त्क

त्+ त= त्त

त्+ म= त्म

त्+ न= त्न

त्+ र= त्र

त्+ य = त्य

त्+ व= त्व

थ्

थ्+ य = थ्य

थ्+ व= थ्व

थ्+ र= थ्र

द्

द्+ ग= द्ग

द्+ द= द्द

द्+ व= द्व

द् + ध= द्ध

द्+ र= द्र

द् + म= द्म

द्+ य= द्य

ध्

ध्+ न= ध्न

ध्+ म= ध्म

ध्+ य= ध्य

ध्+ र= ध्र

ध्+ व= ध्व

न्

न्+ क= न्क

न्+ त= न्त

न्+ द= न्द

न्+ न= न्न

न्+ म= न्म

न्+ व= न्व

प्

प्+ त= प्त

IX Perface.indd 15 11/06/18 4:14 PM

प्+ न= प्र

प्+ म= प्म

प्+ य= प्य

प्+ र= प्र

फ्

फ् + ल= फ्ल

ब्

ब्+ ज= ब्ज

ब्+ द= ब्द

ब्+ ध= ब्ध

ब्+ व= ब्व

ब्+ र= ब्र

भ्

भ्+ न= भ्न

भ्+ य= भ्य

भ्+ व= भ्व

भ्+ र= भ्र

म्

म्+ न= म्न

म्+ म= म्म

म्+ य= म्य

म्+ ल= म्ल

म्+ र= म्र

य्

य्+ य= य्य

य्+ व= य्व

र्

र्+ क= र्क

र्+ त= र्त

र्+ न= र्न

र्+ म= र्म

र्+ य= र्य

ल्

ल्+ क= ल्क

ल्+ त= ल्त

ल्+ न= ल्न

ल्+ प= ल्प

ल्+ ल= ल्ल

व्

व्+ न= व्न

व्+ य= व्य

व्+ र= व्र

श्

श्+ च= श्च

श्+ छ= श्छ

श्+ न= श्न

श्+ व= श्व

श्+ र= श्र

ष्

ष्+ क= ष्क

ष्+ ट= ष्ट

ष्+ ण= ष्ण

ष्+ म= ष्म

ष्+ र= ष्र

स्

स्+ क= स्क

स् + त= स्त

स्+ थ = स्थ

स् + म= स्म

स्+ र= स्र

ह्

ह्+ व= ह्व

ह् + ण= ह्ण

ह्+ न = ह्न

ह् + म= ह्म

ह् + य = ह्य

ह् + र= ह्र

IX Perface.indd 16 11/06/18 4:14 PM

लिङ्गज्ञानम्

(i) पुल्लिङ्गपदानि

1. बालकः	2. अजः	3. गजः	4. अश्वः	5. रथः
6. हस्तः	7. नरः	8. वानरः	9. छात्रः	10. अध्यापकः
11.वृक्षः	12. बकः	13. कन्दुकः	14. सूर्यः	15. मकरः
16. शशकः	17. हंसः	18. काकः	19. मेघः	20.मीनः
21. मयूरः	22. मृगः	23. सिंहः	24.पर्वतः	25. चन्द्रः
26. कृषकः	27. पिकः	28. सर्पः	29. शुकः	30. गर्दभः

(ii) स्त्रीलिङ्गपदानि

1. बालिका	2. लता	3. पेटिका	4. शिबिका	5. माला
6. छात्रा	7. अध्यापिका	8. सेविका	9. महिला	10. मक्षिका
11. कलिका	12. वाटिका	13. शाखा	14. घटिका	15. नौका
16. वर्तिका	17. पताका	18. चटका	19. शाटिका	20. सरिता
21. पाठशाला	22. पत्रिका	23. वेला	24. वेदिका	25. कन्या
26. प्रतिमा	27. कुल्या	28. मासिका	29. जिह्वा	30. पादुका

(iii) नपुंसकलिङ्गपदानि

1. फलम्	2. पत्रम्	3. गृहम्	4. पुष्पम्	5. कमलम्
6. शाकम्	7. नेत्रम्	8. मुखम्	9. धनम्	10. जलम्
11. चित्रम्	12. वनम्	13. विमानम्	14. दुग्धम्	15. भवनम्
16. उद्यानम्	17. नक्षत्रम्	18. नगरम्	19. पुस्तकम्	20. छत्रम्
21. बीजम्	22. यन्त्रम्	23. ओदनम्	24. वस्त्रम्	25. मोदकम्
26. सोपानम्	27. पात्रम्	28. ज्ञानम्	29. शरीरम्	30. उपनेत्रम्

IX Perface.indd 17 11/06/18 4:14 PM

वचनविभागः

(i) पुल्लिङ्गवचनानि

	एकवचनम्	द्विवचनम्	बहुवचनम्
1.	बालकः	बालकौ	बालकाः
2.	अजः	अजौ	अजाः
3.	गजः	गजौ	गजाः
4.	रथः	रथौ	रथाः
5.	वृक्षः	वृक्षौ	वृक्षाः
6.	वानरः	वानरौ	वानराः
7.	अश्वः	अश्वौ	अश्वाः
8.	मयूरः	मयूरौ	मयूराः
9.	शुकः	शुकौ	शुकाः
10.	सिंहः	सिंहौ	सिंहाः

(ii) स्त्रीलिङ्गवचनानि

	एकवचनम्	द्विवचनम्	बहुवचनम्
1.	बालिका	बालिके	बालिकाः
2.	लता	लते	लताः
3.	माला	माले	मालाः
4.	पेटिका	पेटिके	पेटिकाः
5.	महिला	महिले	महिलाः
6.	पताका	पताके	पताकाः
7.	शाखा	शाखे	शाखाः
8.	पाठशाला	पाठशाले	पाठशालाः
9.	नौका	नौके	नौकाः
10.	मक्षिका	मक्षिके	मक्षिकाः

IX Perface.indd 18 11/06/18 4:14 PM

(iii) नपुंसकलिङ्गवचनानि

	एकवचनम्	द्विवचनम्	बहुवचनम्
1.	फलम्	फले	फलानि
2.	पत्रम्	पत्रे	पत्राणि
3.	कमलम्	कमले	कमलानि
4.	नेत्रम्	नेत्रे	नेत्राणि
5.	धनम्	धने	धनानि
6.	वनम्	वने	वनानि
7.	विमानम्	विमाने	विमानानि
8.	गृहम्	गृहे	गृहाणि
9.	मोदकम्	मोदके	मोदकानि
10.	पुस्तकम्	पुस्तके	पुस्तकानि

IX Perface.indd 19 11/06/18 4:14 PM

IX Perface.indd 20 11/06/18 4:14 PM

प्रथमः पाठः

Lesson – 1

द्रविडामृतम्

1

कोण्ड्रै वेन्दन् (கொன்றை வேந்தன்) नामकः ग्रन्थः अव्वैयार् (ஔவையார்) इति नामिकया पण्डितया द्रविडभाषायां विलिखितः। तया कृतेषु धर्मग्रन्थेषु अयमप्येकः। कोण्ड्रै नामकं किञ्चन पुष्पं धार्यमाणस्य पुत्रमधिकृत्य कृतं काव्यमिदम्। अपि चात्र मानवानां सुशीलतायै तया सूक्तयः कथिताः। तासु काश्चन अस्मिन् पाठ्यभागे संस्कृतभाषायाम् अनुवादरूपेण उपस्थाप्यन्ते।।

अव्वैयार् नाम महिला पण्डितशिरोमणिः द्विसहस्रवर्षेभ्यः प्राक् जीविता। अस्याः भागं तमिल्भाषायां अतिमुख्यतमं स्थानं विद्यते। अस्याः रचना- 1. कौन्ड्रै वेन्दन्, 2. नल्वलि, 3.आत्तिचूडि 4. मूदुरै, 5. विनायकरगवल् च इति।



जननी जनकश्चापि प्रत्यक्षे देवते तव।

அன்னையும் பிதாவும் முன்னறி தெய்வம். 1

आलये भगवत्सेवा सुतरां शुभदायिनी।

ஆலயந்தொழுவது சாலவும் நன்று. 2

व्याकृतिः गणितं चापि कथ्येते द्वे विलोचने।

எண்ணும் எழுத்தும் கண்ணெனத்தகும். 3

विद्वत्वकीर्तिः पुत्रस्य तत्पित्रोः कामनीयकम्।

சான்றோர் என்கை ஈன்றோர்க் கழகு. 4

Unit 1.indd 1 06-06-2018 15:16:47

अलभ्ये वाञ्छितार्थे तु तस्य विस्मरणं वरम्।

கிட்டாதாயின் வெட்டென மற. 5

मातृदेहादपि परं देवागारं न विद्यते।

தாயிற் சிறந்தொரு கோயிலுமில்லை. 6

पितृवाक्यात् परो मन्त्रः फलदो नास्त्यपि क्वचित्।

தந்தை சொல்மிக்க மந்திரமில்லை. 7

वचनं ज्ञानवृद्धानां अमृतं समुदीर्यते।

மூத்தோர் சொல்வார்த்தை அமிர்தம். 8

क्षीरान्नमपि संप्राप्तं कालं ज्ञात्वैव भुज्यताम्।

பாலோடாயினும் காலமறிந்துண். 9

पूर्वाह्ने रचितं पापम् अपराह्ने फलप्रदम्।

முற்பகல் செய்யின் பிற்பகல் விளையும். 10

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. जननी - _____
2. जनकः - _____
3. आलयम् - _____
4. सेवा - _____
5. व्याकृतिः - _____
6. विलोचने - _____
7. कीर्तिः - _____
8. पुत्रः - _____
9. आगारः - _____
10. ज्ञानम् - _____
11. वृद्धः - _____
12. क्षीरम् - _____

Unit 1.indd 2 06-06-2018 15:16:47

II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. तव	X	_____	2. पुत्रः	X	_____
3. जननी	X	_____	4. सुतराम्	X	_____
5. पिता	X	_____	6. परम्	X	_____
7. पूर्वम्	X	_____	8. ईप्सितम्	X	_____
9. वृद्धः	X	_____	10. ज्ञानम्	X	_____

III. सन्धिच्छेदं कुरुत-

1. जनकश्चापि- _____+ _____ + _____
2. चापि - _____+ _____
3. चेन्न - _____+ _____
4. नास्त्यपि - _____+ _____ + _____
5. देवागारम् - _____+ _____

IV. सन्धत्त-

1. देहात् + अपि = _____
2. विस्मरेः + अविलम्बितम् = _____
3. समयम् + अपि = _____
4. क्षीरम् + ओदनम् = _____
5. मुहूर्त + अर्धे = _____

V. पाठात् समुचितम् उत्तरं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. _____ प्रत्यक्षे देवते तव ।
2. _____ सुतरां शुभदायिनी ।
3. _____ परो मन्त्रः _____ क्वचित् ।
4. _____ परं _____ न विद्यते ।
5. वचनं _____ समुदीर्यते ।

Unit 1.indd 3 06-06-2018 15:16:47

VI. मातृभाषायाम् अनुवादं कुरुत-

1. जननी जनकश्चापि प्रत्यक्षे देवते तव ।
2. व्याकृतिः गणितं चापि कथ्येते द्वे विलोचने ।
3. पितृवाक्यात् परो मन्त्रः फलदो नास्त्यपि क्वचित् ।
4. क्षीरान्नमपि संप्राप्तं कालं ज्ञात्वैव भुज्यताम् ।
5. पूर्वाह्ने रचितं पापम् अपराह्ने फलप्रदम्।

VII. सविस्तरम् उत्तरं लिखत-

1. द्रविडामृतम् इति पाठात् पञ्च वाक्यानि सानुवादं लिखत ।

VIII. वाक्यप्रयोगं कुरुत-

1. कदाचित् 2. न 3. अपि 4. च 5. यथा-तथा

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अन्यस्य अनुवादः–

1. पितरौ वेद्यौ प्रथमौ देवौ।
2. आलयसेवा नितरां श्लाघ्या।
3. नान्यो धर्मो गृहिणो धर्मात्।
4. दस्युर्भुङ्क्ते कृपणस्य धनम्।
5. भोजनसंह्रतिरबलाभरणम्।
6. मूलाधातो जनकावैरे।
7. गणितं व्याकृतिरिति नेत्रसमम्।
8. पुत्रोऽमृतमिह पितुरनुकूलः।
9. याच्ञायामपि विहितं कार्यम्।
10. देशे वस सत्सुह्रदवलम्बी।
11. श्रेयो वेदाध्ययनाच्छीलम्।
12. ईर्ष्यावादो धननाशाय।
13. धनधान्यं व्ययरहितं चेयम्।

अन्यस्य अनुवादः–

1. अनुरागोऽनुरागेण परीक्षितव्यः।
2. अनुक्तमपि ऊहति पण्डितो जनः।
3. अनुकूले विधौ सर्वं जगत् एतत् कृपालुताम्।
4. अर्थम् अनर्थं भावय नित्यम्।
5. अङ्गीकृतं सुकृतिनः परिपालयन्ति।
6. अवकारे स्थितेऽपि वज्रमणिः महामूल्य एव।
7. अन्धो मुकुरं प्राप्य नोपकृतो भविष्यति।
8. अस्थाना ताडितः श्वा नैव बुक्किष्यति।

Unit 1.indd 4 06-06-2018 15:16:47

द्वितीयः पाठः

Lesson – 2

स्मरणीयाः भारतदेशीयाः 2

भारतं पवित्रतां कर्तुं बहवः यतन्ते स्म। तेषु भारतस्वातन्त्र्याय बहवः राष्ट्रियनेतारः स्वप्राणानपि अपरित्यजन्। तेभ्यः कतिपयेषां जीवनचरित्रम् अस्मिन् गद्यांशे उपस्थाप्यते।

राजेन्द्रप्रसादः -



डा. राजेन्द्रप्रसादः स्वतन्त्रभारतस्य प्रथमः राष्ट्रपतिः आसीत् । अस्य जन्म 1884 तमे वर्षे डिसम्बर् मासस्य तृतीयतारिकायां बिहारप्रान्ते अभवत्। अस्य पितुः नाम महादेवसहायः यः जनेभ्यः निःशुल्कमौषधिं वितरति स्म। एषः एम्.ए., बी.एल्, एम्.एल् च पठितवान् । एषः पाट्नानगरस्थे राष्ट्रियमहाविद्यालये प्राचार्यपदवीम् अलञ्चकार। महात्मनः गान्धिनः सम्पर्कं प्राप्य असौ स्वतन्त्रतायाः आन्दोलने मनसा वाचा कर्मणा च संलग्नः अभवत् । एषः जलप्रलयसमुपस्थिते समये स्वयमेव भोजनादीनि वस्तूनि संगृह्य जनेभ्यः वितरितवान्। एषः 1950 तमे वर्षे स्वतन्त्रभारतस्य राष्ट्रपतिपदे नियुक्तः । एषः स्वमातृभूभेः संस्कृतेः च आजीवनं सेवयन् 1963 तमे वर्षे पञ्चत्वं गतः ।

श्रीलालबहादुरशास्त्री -



श्रीलालबहादुरशास्त्री स्वतन्त्रभारतस्य द्वितीयं प्रधानमन्त्रिपदम् अलञ्चकार। अस्य जन्म 1904 तमे वर्षे अक्टोबर् मासस्य द्वितीयायां तारिकायां उत्तरप्रदेशस्य मुगलसरायनगरे समभूत् । अस्य पितृनाम श्रीशारदाप्रसादः मातृनाम च राजदुलारी आस्ताम् । एषः हरिश्चन्द्रविद्यालये काशीविद्यापीठे च विद्याभ्यासं कृतवान्। तदानीम् एव एषः सत्याग्रहसंग्रामे निगृहीतः कारागारे निक्षिप्तः अभवत् । एषः नाना पदवीम् अलञ्चकार । कदाचित् कामराज योजनानुसारं पदवीं त्यक्तवान् । पश्चात् एषः भारतदेशस्य प्रधानमन्त्रिपदम् अलञ्चकार।

राज्ञी वेलुनाच्चियार् –



वेलुनाच्चियार् 1730 तमे वर्षे तमिल्नाडुप्रान्ते रामनाथपुरस्य राज्ञः चेल्लमुत्तु – विजयरघुनाथ-सेतुपतिः तथा चक्कन्ति अम्बा इत्यनयोः दम्पत्योः पुत्रीत्वेन जनिम् अलभत। इयं बहुभाषाः अधीतवती । इयं यूरोपीयानां आक्रमणस्य विरोधं कर्तुं हैदरलिना साकं संबन्धम् अकरोत्।

Unit 2.indd 5 06-06-2018 15:16:33

अनया चिन्नमरुदु, पेरियमरुदु इति सोदरयोः आध्यक्षे सेना सङ्गृहीता । महायुद्धानि कृत्वा स्वराज्यं प्राप्तवती । इयं 1796 तमे वर्षे डिसम्बर् मासस्य 25 दिनाङ्के जीवत्यागं कृतवती।

तिरुप्पूर् कुमरन् –



तिरुप्पूर् कुमरन् 1904 तमे वर्षे अक्टोबर् मासस्य चतुर्थे दिनाङ्के जन्म प्राप्तवान्। अयं तमिल्नाडुराज्ये ईरोडु-प्रदेशस्य चेन्निमलै-स्थाने जनिम् अलभत। तमिल्नाडुराज्ये सर्वत्र धर्मान्दोलनप्रसारिते समये अयं तिरुप्पूरुतः भागं गृहीतवान्। एषः 1932 तमे वर्षे दशमे दिनाङ्के स्वहस्ते भारतपताकां गृहीत्वा, सेवकसैन्यस्य अध्यक्षं कृत्वा च गच्छन् आसीत् । तदा पाश्चात्य-सैनिकैः बाधितः पताकां गृहीत्वैव मूर्च्छितः। पश्चात् चिकित्सालयं प्रापितः सः 1932 तमे वर्षे जनवरी-मासे एकादशतमे दिनाङ्के वीरमरणम् अवाप्तवान् । एतेन एषः कोटिकात्तकुमरन् इति जनैः उद्घोषितः ।।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1.प्रान्तः - _____

2. निःशुल्कम् - _____

3. महाविद्यालयः- _____

4. पदवी - _____

5. वस्तूनि - _____

6. संलग्नः - _____

7. विरोधः - _____

8. सेना - _____

9. हस्तः - _____

10. सेवकः - _____

II. अधो लिखितानां पदानां व्यतिरेकार्थं लिखत-

1.निःशुल्कम् x _____

2. संलग्नः x _____

3. संगृह्य x _____

4. तदानीम् x _____

5. नाना x _____

6. विरोधः x _____

7. सर्वत्र x _____

8. मूर्च्छितः x _____

9. पश्चात् x _____

10. मरणम् x _____

Unit 2.indd 6 06-06-2018 15:16:33

III. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. डा. राजेन्द्रप्रसादः कदा जनिम् अलभत ?

2. भारतस्य प्रथमः राष्ट्रपतिः कः?

3. स्वतन्त्रभारतस्य द्वितीयः प्रधानमन्त्री कः ?

4. लालबहादुरशास्त्रिणः पितरौ कौ ?

5. डा. राजेन्द्रप्रसादस्य पितुः नाम किम् ?

6. वेलुनाच्चियार् कदा कुत्र जन्म प्राप्तवती ?

7. तिरुप्पूर् कुमरन् नामकः कदा कुत्र जनिम् अलभत ?

8. वेलुनाच्चियार् इत्येतस्याः पितरौ कौ ?

9. तिरुप्पूर् कुमरन् – जनैः कथं उद्घोषितः ?

10. वेलुनाच्चियार् केषाम् आक्रमणस्य विरोधं कर्तुम् ऐच्छत्?

IV. सविस्तरम् उत्तरं लिखत-

1. डा. राजेन्द्रप्रसादमधिकृत्य, श्रीलालबहादुरशास्त्रिणं च अधिकृत्य यथाग्रन्थं लिखत ।

2. तमिलनाडुराज्यस्वतन्त्रकान् उद्दिश्य यथामति लिखत ।

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

संस्कृतभाषायाम् अव्ययानि बहूनि सन्ति। अत्र कानिचन दर्शितानि।अथ,अपि,अलम्, इति,इव, उच्चैः, एव, कदा, कुतः, क्व, खलु, चित्, चेत्, तूष्णीम्, नूनम्, पुरा, मा, मिथ्या, इतस्ततः, अत्र, तत्र, यथा-तथा, यदा-तदा, यद्यपि, यदि-तर्हि, यावत्-तावत्, वरम्, वा, विना, सहसा, हि, ह्यः ।

अपि - अपिसम्भावना-प्रश्न-शङ्का-गर्हा-समुच्चये ।
तथा युक्तपदार्थे च कामचारक्रियासु च ॥

त्वान्तम् - उदाहरणम्- गत्वा, हत्वा ,लिखित्वा
ल्यबन्तम् - उदाहरणम् - वीक्ष्य, निमील्य, आक्रम्य

Unit 2.indd 7 06-06-2018 15:16:33



व्याकरणम् - 1

अजन्तपुल्लिङ्गशब्दाः

1. अकारान्तः पुल्लिङ्गः राम शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रामः	रामौ	रामाः
द्वितीया	रामम्	रामौ	रामान्
तृतीया	रामेण	रामाभ्याम्	रामैः
चतुर्थी	रामाय	रामाभ्याम्	रामेभ्यः
पञ्चमी	रामात्	रामाभ्याम्	रामेभ्यः
षष्ठी	रामस्य	रामयोः	रामाणाम्
सप्तमी	रामे	रामयोः	रामेषु
सम्बोधन-प्रथमा	हे राम !	हे रामौ !	हे रामाः !

2. इकारान्तः पुल्लिङ्गः हरि शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	हरिः	हरी	हरयः
द्वितीया	हरिम्	हरी	हरीन्
तृतीया	हरिणा	हरिभ्याम्	हरिभिः
चतुर्थी	हरये	हरिभ्याम्	हरिभ्यः
पञ्चमी	हरेः	हरिभ्याम्	हरिभ्यः
षष्ठी	हरेः	हर्योः	हरीणाम्
सप्तमी	हरौ	हर्योः	हरिषु
सम्बोधन-प्रथमा	हे हरे !	हे हरी !	हे हरयः !

3. उकारन्तः पुल्लिङ्गः गुरु शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गुरुः	गुरू	गुरवः
द्वितीया	गुरुम्	गुरू	गुरून्
तृतीया	गुरुणा	गुरुभ्याम्	गुरुभिः

Unit 2.indd 8 06-06-2018 15:16:33

चतुर्थी	गुरवे	गुरुभ्याम्	गुरुभ्यः
पञ्चमी	गुरोः	गुरुभ्याम्	गुरुभ्यः
षष्ठी	गुरोः	गुर्वोः	गुरूणाम्
सप्तमी	गुरौ	गुर्वोः	गुरुषु
सम्बोधन-प्रथमा	हे गुरो !	हे गुरू !	हे गुरवः !

4. ऋकारान्तः पुल्लिङ्गः पितृ शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पिता	पितरौ	पितरः
द्वितीया	पितरम्	पितरौ	पितॄन्
तृतीया	पित्रा	पितृभ्याम्	पितृभिः
चतुर्थी	पित्रे	पितृभ्याम्	पितृभ्यः
पञ्चमी	पितुः	पितृभ्याम्	पितृभ्यः
षष्ठी	पितुः	पित्रोः	पितॄणाम्
सप्तमी	पितरि	पित्रोः	पितृषु
सम्बोधन-प्रथमा	हे पितः !	हे पितरौ !	हे पितरः !

5. ओकारान्तः पुल्लिङ्गः गो शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गौः	गावौ	गावः
द्वितीया	गां	गावौ	गाः
तृतीया	गवा	गोभ्यां	गोभिः
चतुर्थी	गवे	गोभ्यां	गोभ्यः
पञ्चमी	गोः	गोभ्यां	गोभ्यः
षष्ठी	गोः	गवोः	गवाम्
सप्तमी	गवि	गवोः	गोषु
सम्बोधन-प्रथमा	हे गौः !	हे गावौ !	हे गावः !

Unit 2.indd 9 06-06-2018 15:16:33

प्रथमः पाठः

Lesson –3

अमृतवाणी

3

अयं पद्यांशः संस्कृतभारत्याः गीतमञ्जरी इति पुस्तकात् स्वीकृतः। अस्य पद्यस्य रचयिता वसन्त गाडगीलः भवति। संस्कृतभाषायाः सुन्दरत्वं, तत्र विद्यमानेतिहासानां तथा काव्यानां नामानि, तत्कर्तृणां च नामानि अत्र प्रदत्तानि विद्यन्ते।।

सुरससुबोधा विश्वमनोज्ञा

ललिता हृद्या रमणीया ।

अमृतवाणी संस्कृतभाषा

नैव क्लिष्टा न च कठिना ।। 1





कविकोकिल-वाल्मीकि-विरचिता

रामायण-रमणीय-कथा ।

अतीव-सरला मधुरमञ्जुला

नैव क्लिष्टा न च कढिना ।। 2

व्यासविरचिता गणेशलिखिता

महाभारते पुण्यकथा ।

कौरव-पाण्डव-सङ्गरमथिता

नैव क्लिष्टा न च कठिना ।। 3





कविकुलगुरु-नव-रसोन्मेषजा

ऋतु-रघु-कुमार-कविता ।

विक्रम-शाकुन्तल-मालविका

नैव क्लिष्टा न च कठिना ।। 4

Unit 3.indd 10 06-06-2018 15:16:14

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. वाणी - _____
2. सरला - _____
3. क्लिष्टा - _____
4. कठिना - _____
5. रमणीया - _____
6. कथा - _____
7. मधुरा - _____
8. मञ्जुला - _____
9. कविः - _____
10. गुरुः - _____
11. ऋतुः - _____
12. वनं - _____
13. लिखिता - _____
14. विश्वम् - _____
15. कविता - _____

II. अधो लिखितानां पदानां व्यतिरेकपदानि लिखत-

1. सुबोधा x _____
2. ललिता x _____
3. अमृतम् x _____
4. क्लिष्टा x _____
5. सरलम् x _____
6. मधुरम् x _____
7. पुण्यम् x _____
8. नवम् x _____
9. गुरुः x _____
10. कठिना x _____

III. सन्धिच्छेदं कुरुत-

1. नैव = ____ + _____
2. अतीव = ____ + _____
3. रसोन्मेषजा = ____ + _____

Unit 3.indd 11 06-06-2018 15:16:14

IV. श्लोकं पूरयत-

1. कवि कोकिल_____

_____ रमणीयकथा ।

अतीव_____मञ्जुला

नैव_____ न च _____ ।।

2. _____ गणेश _____

_____पुण्यकथा ।

कौरव-_____

नैव_____ न च _____ ।।

3. कविकुलगुरु-_____

_____-कुमार-कविता ।

_____-मालाविका

नैव_____ न च _____ ।।

V. योजयत-

अमृतवाणी	-	महाभारतम्
वाल्मीकिः	-	संस्कृतभाषा
व्यासः	-	शाकुन्तलम्
नाटकम्	-	रघुवंशः
काव्यम्	-	रामायणम्

VI. प्रश्नानाम् उत्तराणि लिखत-

1. का नैव क्लिष्टा न च कठिना भवति ?
2. रामायणस्य कर्ता कः ?
3. व्यासेन विरचितः इतिहासः कः ?
4. का पुण्यकथा इति प्रथिता ?

Unit 3.indd 12 06-06-2018 15:16:14

5. कविकुलगुरुः कः भवति ?

6. कविकोकिलः इति कस्य प्रशस्तिः?

7. कालिदासेन विरचितानि काव्यानि कानि ?

8. कालिदासेन कृतानां नाटकानां नामानि लिखत।

9. अमृतवाणी का भवति?

10. संस्कृतभाषा कीदृशी बोधा भवति ?

VII. सविस्तरम् उत्तरं लिखत-

1. संस्कृतभाषा कीदृशी ?

2. रामायणं केन विरचितम् ? तत् कीदृशं भवति ?

3. व्यासेन किं रचितम् ? तत्र कः विषयः ?

4. कालिदासेन विरचितानां काव्यानां नामानि लिखत ।

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अन्यस्य अनुवादः–

संस्कृतभाषा संस्कारम् उपगता भाषा इत्यर्थः भवति। इयं कस्यचित् प्रदेशस्य भाषा न भवति। अतः इयं विश्वभाषा इति वक्तुं शक्यते। अस्याः देवभाषा, गैर्वाणी इत्यादीनि नामधेयानि सन्ति।

कविकोकिलः वाल्मीकिः:-

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ।। इति श्लोकेन वाल्मीकिरेव रामायणस्य प्रणेता इति ज्ञायते।

यदा सः तपसि स्थितः, तदा तस्य उपरि वल्मीकम् अभवत्। वल्मीकान्तरितः सः महता कालेन ततः निर्गतः इत्यनेन तस्य वाल्मीकिरिति नाम अन्वर्थम् अभवत्।

Unit 3.indd 13 06-06-2018 15:16:14

कूजन्तं राम रामेति

मधुरं मधुराक्षरम्।

आरुह्य कविता-शाखां

वन्दे वाल्मीकि-कोकिलम्।।

वाल्मीकिः काव्यकानने राम-रामेति मधुरं कूजन् कलरवरुचिरः कोकिल इति संस्मर्यते सूरिभिः। स एव आदिकविः, तस्य रामायणम् आदिकाव्यमिति च प्रसिद्धम्।

अद्यत्वे सप्तकाण्डात्मकं श्रीमद्रामायणम्। पुनश्च चतुर्विंशतिसहस्रश्लोघटितं पञ्चशतसर्गघटितञ्च। एतस्य सप्तकाण्डानि क्रमशः-

1. बालकाण्डम्
2. अयोध्याकाण्डम्
3. अरण्यकाण्डम्
4. किष्किन्धाकाण्डम्
5. सुन्दरकाण्डम्
6. युद्धकाण्डम्
7. उत्तरकाण्डम्

बालकाण्डे रामजन्मतः रामविवाहपर्यन्तम्,

अयोध्याकाण्डे रामराज्याभिषेकप्रसङ्गेन सह तस्य अकस्मात् वनगमनम्,

अरण्यकाण्डे पञ्चवट्याः वर्णनं, खरदूषणवधं,

किष्किन्धाकाण्डे हनूमानस्य समुद्रसन्तरणम्,

सुन्दरकाण्डे लङ्कावर्णनं, हनुमानेन अशोकवाटिकायां सीतादर्शनं, लङ्कापुरीदाहनं च,

युद्धकाण्डे सेतुनिर्माणम्, युद्धे रावणहननम्, सीतासम्प्राप्तिः, राज्याभिषेकश्च,

उत्तरकाण्डे सीतापरित्यागः, लवकुशयोः रामेण सह सम्मिलनं, सीतायाः पृथिव्यां प्रवेशः च वर्णिताः विलसन्ति।।

Unit 3.indd 14 06-06-2018 15:16:14

महाभारते पुण्यकथा -

महर्षिणा वेदव्यासेन विरचितः बहुप्रसिद्धः इतिहासः विद्यते। अस्मिन् ग्रन्थे कौरव-पाण्डवानां महायुद्धं मुख्य-विषयरूपेण वर्णितमस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अत्र विशालग्रन्थे सन्निवेशिताः।

इदं प्रायः सर्वे भारतीयाः विद्वांसो मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना ततः परतश्च महाभारतनाम्ना प्रसिद्धम्। सूक्ष्मेक्षिकयाऽवलोकनेन ज्ञायते यत् - महाभारतस्य प्रगते चरणत्रयं विद्यते। प्रथमे चरणे जयनामकं काव्यमेतत् ८८०० श्लोकपरिमितं व्यासकृतं धर्मचर्चाम् आश्रित्य महर्षि व्यासेन स्वशिष्याय वैशम्पायनाय श्रावितमभूत्।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।

देवीं सरस्वतीं चैव ततो जयमुदीरयेत्।।

प्रत्येकस्य अध्यायस्य आदौ विद्यमानः अयं प्रसिद्धः श्लोकः इदं निरूपयति । द्वितीये चरणे भारतनामकं महाकाव्यमेतत् वैशम्पायनकृतं २४ सहस्रश्लोकपरिमितं (चतुर्विंशतिसाहस्री) वैशम्पायनेन अर्जुनस्य प्रपौत्राय जनमेजयाय नागयज्ञे श्रावितमभूत्।

तृतीये चरणे महाभारतनामकं महाकव्यमेतत् लोमहर्षपुत्रेण सौतिकेन रचितम् एकलक्षश्लोकपरिमितं नैमिषारण्ये यज्ञकाले शौनकादिभ्यः ऋषिभ्यः श्रावितमभूत्।

महाभारतमष्टादशसु पर्वसु विभक्तं वर्तते। तस्मिंश्च आदि, सभा, वन, विराट, उद्योग, भीष्म, द्रोण, कर्ण, शल्य, सौप्तिक, स्त्री, शान्ति, अनुशासन, अश्वमेध, आश्रमवासिक, मौसल, महाप्रास्थानि, स्वर्गारोहणपर्वणि सन्ति ।

अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते ।

अस्य महाभारतस्य सारांशः तावत् एकेन श्लोकेन उपस्थाप्यते यत् –

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं

द्यूते श्रीहरणं वने विहरणं मत्स्यालये वर्धनम् ।

लीलागोग्रहणं रणे वितरणं सन्धिक्रियाजृम्भणं

भीष्मद्रोणसुयोधनादिमथनं एतन्महाभारतम् ।।

Unit 3.indd 15 06-06-2018 15:16:14

प्रथमः पाठः

Lesson – 4

संस्कृतमहिमा

4

संस्कृतभाषा तु विश्वे विद्यामानासु प्राचीनतमासु भाषासु अन्यतमा भवति। अस्मिन् गद्यांशे संस्कृतस्य महिमा कथं भवतीति उच्यते। तस्याः भाषागतवैशिष्ट्यं साहित्यगतवैशिष्ट्यं च प्रदर्श्यते।।

संस्कृतभाषा निखिलविश्वस्य वाङ्मयेषु प्राचीनतमा भाषा वर्तते। अस्यामेव भाषायां उपनिबद्धाः वेदाः तारस्वरेण संस्कृतभाषायाः वैशिष्ट्यम् उद्घोषयन्ति। न केवलं भारतीयाः प्रत्युत पाश्चत्याः अपि विद्वांसः संस्कृतभाषायाः महत्वं स्वीकुर्वन्ति। प्राचीनभारतीयानां संस्कृतिः, सामाजिकी व्यवस्था च अस्यां भाषायां निहता अस्ति।



Unit 4.indd 16 06-06-2018 15:15:51

संस्कृतभाषा भारतस्य प्राचीनतमा भाषा अस्ति। संस्कृतम् अस्य देशस्य अन्यभाषाणां मूलस्रोतः अस्ति। संस्कृतस्य शब्दाः हिन्दी-बंगला-मराठी प्रभृति भाषासु विद्यन्ते। संस्कृतस्य अध्ययनेन उक्तभाषाशब्दानां शुद्धरूपं ज्ञायते।



Unit 4.indd 17 06-06-2018 15:15:53

संस्कृतस्य साहित्यम् अतिविशालमस्ति। अस्यां भाषायां लिखितानां काव्यानां नाटकानां च अध्ययनेन हृदयम् आनन्दसिन्धौ निमज्जति। पुरा आदिकविः वाल्मीकिः संस्कृतभाषायामेव रामायणम् अलिखत्। व्यासोऽपि विश्वविख्यातं महाभारतग्रन्थं संस्कृते एव अलिखत्।



कालिदास – भारवि – माघ – श्रीहर्षादयः अनेक महाकवयः संस्कृते रघुवंशम् – कुमारसंभवम् – किरातार्जुनीयम् – शिशुपालवधम् – नैषधम् इत्यादीनि सुन्दराणि काव्यानि अलिखन्। अस्याः भाषायाः काव्यानां माधुर्यं विश्वप्रसिद्धम् अस्ति।।

Unit 4.indd 18 06-06-2018 15:15:54

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. वाङ्मयम् - _____
2. वेदाः - _____
3. विद्वांसः - _____
4. प्राचीनतमा - _____
5. साहित्यम् - _____

II. अधो लिखितानां पदानां विलोमपदानि लिखत-

1. प्राचीनतमा x _____
2. विद्वांसः x _____
3. व्यवस्था x _____
4. अस्ति x _____
5. शुद्धरूपम् x _____

III. पाठात् उचितमुत्तरं चित्वा रिक्तस्थानानि पूरयत-

1. _____ निखिलविश्वस्य च वाङ्मयेषु प्राचीनतमा भाषा वर्तते ।
2. संस्कृतभाषा भारतस्य एव न अपि तु _____ प्राचीनतमा भाषा अस्ति ।
3. संस्कृतस्य _____अतिविशालमस्ति ।
4. आदिकविः _____ संस्कृतभाषायामेव रामायणम् अलिखत् ।
5. संस्कृतं अस्य देशस्य_____ मूलस्रोतः अस्ति ।

Unit 4.indd 19 06-06-2018 15:15:54

IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. विश्ववाङ्मयेषु प्राचीनतमा भाषा का ?

2. वेदाः कस्याम् उपनिबद्धाः ?

3. कस्य साहित्यम् अतिविशालमस्ति ?

4. संस्कृतस्य शब्दाः कासु भाषासु विद्यन्ते ?

5. आदिकविः कः?

6. महाकवयः के?

7. सुन्दराणि काव्यानि कानि?

8. इतिहासौ कौ?

V. सविस्तरम् उत्तरं लिखत-

1. संस्कृतभाषायाः महत्वं लिखत ।

2. संस्कृतसाहित्ये रचितानि काव्यानि कानि ?

VI. योजयत-

1. कालिदासः	-	किरातार्जुनीयम्
2. वाल्मीकिः	-	शिशुपालवधम्
3. व्यासः	-	रघुवंशम्
4. भारविः	-	रामायणम्
5. माघः	-	महाभारतम्

VII. अधोलिखितानि पदानि उपयुज्य वाक्यरचनां कुरुत-

1. च	2. पुरा	3. अपि
4. न	5. अस्ति	6. एव

.....

Unit 4.indd 20 06-06-2018 15:15:54

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अन्यस्य अनुवादः–

संस्कृते रघुवंशम्, कुमारसंभवम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधम् इति पञ्चमहाकाव्यानि सन्ति। तेषु रघुवंशं, कुमारसंभवम् इति काव्यद्वयं कालिदासेन विरचितम्। किरातार्जुनीयं तु भारविना कृतम्। माघः शिशुपालवधम् अलिखत्। नैषधमहाकाव्यं श्रीहर्षकविना रचितम्।

रघुवंशम् एकोनविंशतिसर्गात्मकं भवति। रघुवंशस्य कथावस्तु सूर्यवंशस्य राज्ञां वर्णनाधारितम् अस्ति। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता अस्ति। तदुत्तरं रामवंशीयानां तत्तन्नृपाणां चरितानि उपन्यस्तानि।

कुमारसम्भवं शिवपार्वत्योः प्रेम्णः वर्णनपुरस्सरं देवसेनापतेः स्कन्धस्य कुमारस्य जननवर्णनयुक्तम् अपूर्वं महाकाव्यं भवति । इदमपि महाकाव्यं १७ सर्गात्मकम् । परं पूर्वं २२ सर्गाः स्युः इति केषाञ्चित् विदुषाम् अभिप्रायः। सृष्टिकर्तुः ब्रह्मदेवस्य वरप्रसादेन तारकासुरः प्रबलो भूत्वा सकलान् अमरान् पीडयामास। तस्मात् ब्रह्मणः सूचनानुसारं शिवपार्वत्योः विवाहं अकारयन् देवाः । तयोः पुत्रेण कुमारेण तारकासुरः निहतः । अयं कथाभागः अत्र कविना सुमधुरसरसशैल्या वर्णितः ।

किरातार्जुनीयस्य कथानकस्य मूलाधारः महाभारतम् अस्ति। इदं काव्यम् अष्टादशसर्गात्मकं भवति। महाभारतस्य अष्टादशसर्गेषु वनपर्वणि किरातार्जुनीयस्य कथा अस्ति। अत्र किरातः तत्ववेषधारी शिवः अस्ति। महाभारतात् संक्षिप्तकथानकं स्वीकृत्य भारविः स्वकल्पनाभिः काव्यप्रतिभया च कथानके मौलिकताम् उत्पादितवान्। महाभारतस्य शैली सरला अस्ति। किन्तु किरातार्जुनीयस्य शैली क्लिष्टा अलङ्कृता च अस्ति। महाकाव्यलक्षणानुरोधेन भारविः स्थाने स्थाने ऋतु- पर्वत- नदी- वन- प्रातः-सन्ध्यादीनाम् अपि सुन्दरं वर्णनं कृतवान्। भारवेरर्थगौरवम् इत्युक्त्यनुसारम् किरातर्जुनीयस्य अर्थगौरवम् अतीव प्रसिद्धम् अस्ति।

विंशतिसर्गात्मकस्य शिशुपालवधमहाकाव्यस्य रचना तु महाकविमाघेन महाभारतस्य कथामाश्रित्य विहिता । श्रीकृष्णेन कृतः शिशुपालस्य वधः अत्र प्राधान्येन वर्णितः। अनेके श्लोकास्तु प्रायः महाभारतस्य श्लोकैः समम् एव दृश्यन्ते। महाभारतस्य सभापर्वस्य ३३ तमात् ४५ पर्यन्तेषु त्रयोदशसु अध्यायेषु शिशुपालवधस्य कथा उपलभ्यते । इयं कथा श्रीमद्भागवतेऽपि दशमस्कन्धस्य ७४ तमेऽध्याये सूक्ष्मरुपेण वर्तते।

महाकविना श्रीहर्षेण नैषधीयचरितमहाकाव्ये नलदमयन्त्याः स्नेहकथायाः चित्ताकर्षकं वर्णनं द्वाविंशतिसर्गेषु समाहितम् । नैषधं विद्वदौषधम् इति उक्त्यनुसारं काव्यमिदं कठिनमस्ति। अस्मिन् निषधराजः नलः विदर्भस्य राजकन्या दमयन्ती इत्यनयोः विवाहः, हंसस्य दौत्यं, प्रतिसन्देशप्राप्तिः, नलस्य वरणं, राजकुमारस्य वर्णनं, दमयन्तीवर्णनं, दमयन्तीस्वयंवरः, नलस्य राज्यशासनम् इत्यादयः विषयाः चातुर्येण वर्णिताः सन्ति ।

Unit 4.indd 21 06-06-2018 15:15:54



व्याकरणम् - 2

धातुः – आत्मनेपदी – लट् लकारः

1. एध्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	एधते	एधेते	एधन्ते
मध्यमपुरुषः (II Person)	एधसे	एधेथे	एधध्वे
उत्तमपुरुषः (III Person)	एधे	एधावहे	एधामहे

2. वन्द्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	वन्दते	वन्देते	वन्दन्ते
मध्यमपुरुषः (II Person)	वन्दसे	वन्देथे	वन्दध्वे
उत्तमपुरुषः (III Person)	वन्दे	वन्दावहे	वन्दामहे

3. लभ्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	लभते	लभेते	लभन्ते
मध्यमपुरुषः (II Person)	लभसे	लभेथे	लभध्वे
उत्तमपुरुषः (III Person)	लभे	लभावहे	लभामहे

Unit 4.indd 22 06-06-2018 15:15:54

4. रम्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	रमते	रमेते	रमन्ते
मध्यमपुरुषः (II Person)	रमसे	रमेथे	रमध्वे
उत्तमपुरुषः (III Person)	रमे	रमावहे	रमामहे

5. यत्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	यतते	यतेते	यतन्ते
मध्यमपुरुषः (II Person)	यतसे	यतेथे	यतध्वे
उत्तमपुरुषः (III Person)	यते	यतावहे	यतामहे

6. मुद्			
पुरुषः (Person)	एकवचनम् (Singular)	द्विवचनम् (Dual)	बहुवचनम् (Plural)
प्रथमपुरुषः (I Person)	मोदते	मोदेते	मोदन्ते
मध्यमपुरुषः (II Person)	मोदसे	मोदेथे	मोदध्वे
उत्तमपुरुषः (III Person)	मोदे	मोदावहे	मोदामहे

Unit 4.indd 23 06-06-2018 15:15:54

पञ्चमः पाठः

Lesson – 5

सुभाषितानि 5

अयं पाठ्यभागः सुभाषितरत्नावलीग्रन्थात् उद्धृतः। सुभाषितरत्नावल्यां तावत् पौराणिकग्रन्थेभ्यः तथा काव्यग्रन्थेभ्यः च यानि पद्यानि जनान् उपदेष्टुम् अर्हानि भवन्ति तानि संकलितानि। अस्मिन् पाठे धर्मस्य, विद्यायाः, शीलस्य, औदार्यस्य च प्रशंसा प्रकटीकृता।



सत्यम्-

सत्येन धार्यते पृथ्वी

सत्येन तपते रविः ।

सत्येन वायवो वान्ति

सर्वं सत्ये प्रतिष्ठितम् ।। 1

Unit 5.indd 24 06-06-2018 15:17:33

धर्मः-

एको धर्मः परं श्रेयः

क्षमैका शान्तिरुत्तमा ।

विद्यैका परमा तृप्तिः

अहिंसैका सुखावहा ।। 2

परोपकारः-

परोपकरणं येषां

जागर्ति हृदये सताम्।

नश्यन्ति विपदस्तेषां

सम्पदः स्युर्पदे पदे।। 3

उद्यमः-

आलस्यं हि मनुष्याणां

शरीरस्थो महान् रिपुः ।

नास्त्युद्यमसमो बन्धुः

यं कृत्वा नावसीदति ।। 4

औदार्यम्-

उदारस्य तृणं वित्तं

शूरस्य मरणं तृणम् ।

विरक्तस्य तृणं भार्या

निःस्पृहस्य तृणं जगत् ।। 5

Unit 5.indd 25 06-06-2018 15:17:33

सत्सङ्गतिः-

चन्दनं शीतलं लोके

चन्दनादपि चन्द्रमाः ।

चन्द्रचन्दनयोर्मध्ये

शीतला साधुसंगतिः ।। 6

शीलम्-

अभिवादनशीलस्य

नित्यं वृद्धोपसेविनः ।

चत्वारि तस्य वर्धन्ते

आयुर्विद्यायशोबलम् ।। 7

मानम्-

अधमाः धनमिच्छन्ति

धनं मानं च मध्यमाः ।

उत्तमाः मानमिच्छन्ति

मानो हि महताम् धनम् ।। 8

विद्या-

न चोरहार्यं न च राजहार्यं

न भ्रातृभाज्यं न च भारकारि ।

व्यये कृते वर्धत एव नित्यं

विद्याधनं सर्वधनप्रधानम् ।। 9

Unit 5.indd 26 06-06-2018 15:17:33

महान्-

उदये सविता रक्तः

रक्तश्चास्तमये तथा ।

सम्पत्तौ च विपत्तौ च

महतामेकरूपता ।। 10

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. पृथ्वी - _____
2. रविः - _____
3. वायुः - _____
4. धर्मः - _____
5. श्रेयः - _____
6. अहिंसा - _____
7. क्षमा - _____
8. परोपकारः - _____
9. आलस्यम् - _____
10. रिपुः - _____
11. बन्धुः - _____
12. तृणम् - _____
13. स्पृहा - _____
14. चन्द्रमाः - _____
15. सविता - _____

II. अधो लिखितानां पदानां व्यतिरेकपदानि लिखत-

1. एकः X _____
2. सत्यम् X _____
3. धर्मः X _____
4. तृप्तिः X _____
5. उत्तमा X _____
6. सताम् X _____
7. आलस्यम् X _____
8. रिपुः X _____

Unit 5.indd 27 06-06-2018 15:17:33

9. शीतलम् X _____ 10. व्ययः X _____

11. नित्यम् X _____ 12. सम्पत्तौ X _____

III. सन्धिच्छेदं कुरुत-

1. क्षमैका - _____ + _____

2. शान्तिरुत्तमा - _____ + _____

3. विद्यैका - _____ + _____

4. अहिंसैका - _____ + _____

5. विपदस्तेषां - _____ + _____

6. स्युर्पदे - _____ + _____

7. नास्त्युद्यमसमः - _____ + _____

IV. सन्धत्त-

1. न + अवसीदति = _____

2. महताम् + एकरूपता = _____

3. चन्दनात् + अपि = _____

4. वृद्ध + उपसेविनः = _____

5. आयुः + विद्या = _____

6. धनम् + इच्छन्ति = _____

7. मानम् + इच्छन्ति = _____

V. श्लोकं पूरयत-

1. सत्येन धार्यते _____

_____ तपते रविः ।

सत्येन _____ वान्ति

सर्वं _____ प्रतिष्ठितम् ।।

Unit 5.indd 28 06-06-2018 15:17:33

2. _____ मनुष्याणां

शरीरस्थो _____ ।

नास्त्युद्यमसमो _____

यं कृत्वा _____ ।।

3. उदारस्य_____

शूरस्य_____ ।

_____तृणं भार्या

_____तृणं जगत् ।।

4. _____ शीतलं लोके

_____चन्द्रमाः ।

_____मध्ये

शीतला _____।।

5. उदये _____ रक्तः

_____ तथा ।

सम्पत्तौ च _____

महतां _____ ।।

VI. प्रश्नानाम् उत्तराणि लिखत-

1. कुत्र सर्वं प्रतिष्ठितम् ?

2. का एका सुखावहा ?

3. शरीरस्थः महान् रिपुः कः ?

4. निःस्पृहस्य धनं किम् ?

5. सतां हृदये किं जागर्ति ?

Unit 5.indd 29 06-06-2018 15:17:34

6. चन्दनादपि शीतलं किम् ?

7. कस्य चत्वारि वर्धन्ते ?

8. उत्तमाः किम् इच्छन्ति ?

9. विद्याधनं कीदृशं भवति ?

10. सम्पत्तौ च विपत्तौ च केषाम् एकरूपता भवति ?

VII. सविस्तरम् उत्तरं लिखत-

1. विवरणं कुरुत –

(i) सत्यम् (ii) धर्मः (iii) परोपकारः

2. विशदयत –

(i) औदार्यम् (ii) शीलम् (iii) मानम्

3. टिप्पणीं लिखत–

(i) उद्यमः (ii) महान् (iii) विद्या

VIII . मातृभाषायाम् अनुवादं कुरुत-

1. चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
   चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगतिः ।।
2. उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
   विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ।।

IX. ससन्दर्भं भावं लिखत-

1. सम्पदः स्युर्पदे पदे ।
2. चत्वारि तस्य वर्धन्ते ।
3. विद्याधनं सर्वधनप्रधानम् ।
4. महतामेकरूपता ।

Unit 5.indd 30 06-06-2018 15:17:34

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सूक्तयः –

सत्सङ्गतिः कथय किं न करोति पुंसाम्।

आचारः परमो धर्मः।

विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य।

परोपकाराय सतां विभूतयः।

चित्ते वाचि क्रियायां च साधूनामेकरूपता।

काले खलु समारब्धाः फलं बध्नन्ति नीतयः।

सन्तोष एव पुरुषस्य परं निधानम्।

क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।

श्लोकाः –

1. गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
   अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।
2. अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
   व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।
3. कीटोऽपि सुमनः सङ्गात् आरोहति सतां शिरः ।
   अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ।।
4. गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
   विक्रीयन्ते न घण्टाभिः गावः क्षीरविवर्जिताः ।।

Unit 5.indd 31 06-06-2018 15:17:34

षष्ठः पाठः

Lesson – 6

शुकनासोपदेशः 6

शुकनासोपदेशोऽयं पाठ्यांशः बाणभट्टेन विरचितात् कादम्बरी नामकग्रन्थात् स्वीकृतः। तारापीडस्य पुत्रः चन्द्रापीडः। सः सर्वान् शास्त्रान् अधीत्य राज्यम् आगतवान्। यौवनं तं राज्ये अभिषिक्तुं पिता ऐच्छत्। तदा शुकनासः चन्द्रापीडं यौवनस्य दोषत्वेन काञ्चन विषयान् उपदिशति।

अथ समुपस्थितयौवराज्याभिषेकं चन्द्रापीडं कदाचिद् दर्शनार्थम् आगतं शुकनासः सविस्तरम् उवाच –

"तात चन्द्रापीड! अधीतसर्वशास्त्रस्य ते न अल्पम् अपि उपदेष्टव्यम् अस्ति। केवलम् अतिगहनं खलु तमो यौवनप्रभवम्, दारुणो लक्ष्मीमदः, विषमः विषयविषास्वादमोह इति विस्तरेणाभिधीयसे। यौवनारम्भे प्रायः शास्त्र – जल – प्रक्षालन – निर्मलापि कालुष्यमुपयाति बुद्धिः, अपहरति च वात्या इव शुष्कपत्रम् अतिदूरं यौवनसमये पुरुषं प्रकृतिः, नाशयति च उन्मार्गप्रवर्तकः पुरुषम् अत्यासङ्गः विषयेषु।



Unit 6.indd 32 06-06-2018 15:20:30

तद् अस्मिन् राज्यतन्त्रे यौवने च कुमार ! तथा प्रयतेथा यथा नोपहास्यते जनैः, न निन्द्यसे जनैः, न धिक् क्रियसे गुरुभिः, न शोच्यसे विद्वद्भिः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न नर्त्यसे मदेन, न विडम्ब्यसे लक्ष्म्या, न चाऽपह्रियसे सुखेन । कामं भवान् प्रकृत्या एव धीरः, तथापि भवद्गुणसन्तोषो माम् एवं मुखरीकृतवान् इदम् एव च पुनः पुनरभिधीयसे ! विद्वांसम् अपि, सचेतनम् अपि, धीरम् अपि, अभिजातम् अपि च पुरुषम् खलीकरोति लक्ष्मीरिति।

उक्तञ्च-

यौवनं धनसम्पत्तिः

प्रभुत्वमविवेकता ।

एकैकमप्यनर्थाय

किमु यत्र चतुष्टयम् ।।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. युवराजः	-	_____	2. अभिषेकम्	-	_____
3. उवाच	-	_____	4. तमः	-	_____
5. यौवनम्	-	_____	6. दारुणः	-	_____
7. विषमः	-	_____	8. जलम्	-	_____
9. प्रक्षालनम्	-	_____	10. बुद्धिः	-	_____

II. अधो लिखितानां पदानां विरुद्धार्थकं लिखत-

1. आगतम्	x	_____	2. कदाचित्	x	_____
3. अल्पम्	x	_____	4.दूरम्	x	_____
5. धीरः	x	_____	6. यौवनम्	x	_____

III. सन्धिच्छेदं कुरुत-

1. राज्याभिषेकम् - _____+ _____
2. दर्शनार्थम् - _____+ _____

Unit 6.indd 33 06-06-2018 15:20:30

3. विस्तरेणाभिधीयते - _____+ _____

4. यौवनारम्भे - _____+ _____

5. नोपहास्यते - _____+ _____

IV. रिक्तस्थानानि पूरयत-

1. _____ खलु तमः यौवनप्रभवम् ।

2. _____लक्ष्मीमदः।

3. भवान् प्रकृत्या एव _____।

4. _____विषयास्वादमोहः ।

5. यौवनं _____सम्पतिः ।

V. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. शुकनासः कम् उपदिशति ?

2. चन्द्रापीडः कः ?

3. अतिगहनम् किम् ?

4. लक्ष्मीमदः कीदृशः भवति ?

5. यौवनारम्भे बुद्धिः कीदृशम् उपयाति ?

6. यौवनसमये प्रकृतिः कं नाशयति ?

7. लक्ष्मीः कीदृशमपि पुरुषं खलीकरोति ?

8. अनर्थचतुष्टयं किम् ?

VI. सविस्तरम् उत्तरं लिखत-

1. शुकनासोपदेशे यौवनकालस्य दोषत्वेन वर्णिताः विषयाः के?

2. शुकनासः चन्द्रपीडं वर्जनीयविषयत्वेन किम् उपदिशति ?

Unit 6.indd 34 06-06-2018 15:20:30

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अन्यस्य अनुवादः–

आलोकयतु तावत् लक्ष्मीमेव प्रथमं भवान्। एवंविधम् अपरिचितमिह जगति न किञ्चिदस्ति यथेयम् अनार्या। लब्ध्वापि दुःखेन परिपाल्यते। न परिचयं रक्षति। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न धर्मम् अनुरुध्यते। न त्यागम् आद्रियते। न विशेषज्ञतां विचारयति। प्रबलविधृता अपि इयं परिस्खलति। जनं गुणवन्तम् अपवित्रमिव न स्पृशति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेवकज्जलमलिनमेव केवलं कर्म उद्वमति। नहि तं पश्यामि यो हि अपरिचितया अनया निर्भरम् उपगूढः यो वा न विप्रलब्धः।

यौवनम् –

धनिनोऽपि निरुन्मादाः युवानोऽपि चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः।।

धनसंपत्तिः –

अधमाः धनमिच्छन्ति
धनं मानं च मध्यमाः।
उत्तमाः मानमिच्छन्ति
मानो हि महतां धनम्।।

प्रभुत्वम् –

स्वगृहे पूज्यते मूर्खः
स्वग्रामे पूज्यते प्रभुः।
स्वदेशे पूज्यते राजा
विद्वान् सर्वत्र पूज्यते।

अविवेकता –

सहसा विदधीत न क्रियां
अविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव संपदः।।

Unit 6.indd 35 06-06-2018 15:20:30



व्याकरणम् - 3

अजन्तस्त्रीलिङ्गशब्दाः

1. आकारान्तः स्त्रीलिङ्गः रमा शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रमा	रमे	रमाः
द्वितीया	रमाम्	रमे	रमाः
तृतीया	रमया	रमाभ्यां	रमाभिः
चतुर्थी	रमायै	रमाभ्यां	रमाभ्यः
पञ्चमी	रमायाः	रमाभ्यां	रमाभ्यः
षष्ठी	रमायाः	रमयोः	रमाणाम्
सप्तमी	रमायाम्	रमयोः	रमासु
संबोधन-प्रथमा	हे रमे !	हे रमे !	हे रमाः !

2. इकारान्तः स्त्रीलिङ्गः मति शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मतिः	मती	मतयः
द्वितीया	मतिम्	मती	मतीः
तृतीया	मत्या	मतिभ्यां	मतिभिः
चतुर्थी	मत्यै-मतये	मतिभ्यां	मतिभ्यः
पञ्चमी	मत्याः-मतेः	मतिभ्यां	मतिभ्यः
षष्ठी	मत्याः-मतेः	मत्योः	मतीनाम्
सप्तमी	मत्याम्-मतौ	मत्योः	मतिषु
संबोधन-प्रथमा	हे मते !	हे मती !	हे मतयः !

Unit 6.indd 36 06-06-2018 15:20:30

3. ईकारान्तः स्त्रीलिङ्गः नदी शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नदी	नद्यौ	नद्यः
द्वितीया	नदीम्	नद्यौ	नदीः
तृतीया	नद्या	नदीभ्यां	नदीभिः
चतुर्थी	नद्यै	नदीभ्यां	नदीभ्यः
पञ्चमी	नद्याः	नदीभ्यां	नदीभ्यः
षष्ठी	नद्याः	नद्योः	नदीनाम्
सप्तमी	नद्याम्	नद्योः	नदीषु
संबोधन-प्रथमा	हे नदि !	हे नद्यौ !	हे नद्यः !

4. उकारान्तः स्त्रीलिङ्गः धेनु शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	धेनुः	धेनू	धेनवः
द्वितीया	धेनुम्	धेनू	धेनूः
तृतीया	धेन्वा	धेनुभ्यां	धेनुभिः
चतुर्थी	धेन्वै-धेनवे	धेनुभ्यां	धेनुभ्यः
पञ्चमी	धेन्वाः-धेनोः	धेनुभ्यां	धेनुभ्यः
षष्ठी	धेन्वाः-धेनोः	धेन्वोः	धेनूनाम्
सप्तमी	धेन्वाम्-धेनौ	धेन्वोः	धेनुषु
संबोधन-प्रथमा	हे धेनो !	हे धेनू !	हे धेनवः !

Unit 6.indd 37 06-06-2018 15:20:30

5. ऋकारान्तः स्त्रीलिङ्गः मातृ शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	माता	मातरौ	मातरः
द्वितीया	मातरम्	मातरौ	मातॄः
तृतीया	मात्रा	मातृभ्यां	मातृभिः
चतुर्थी	मात्रे	मातृभ्यां	मातृभ्यः
पञ्चमी	मातुः	मातृभ्यां	मातृभ्यः
षष्ठी	मातुः	मात्रोः	मातॄणाम्
सप्तमी	मातरि	मात्रोः	मातृषु
संबोधन-प्रथमा	हे मातः !	हे मातरौ !	हे मातरः !

Unit 6.indd 38 06-06-2018 15:20:30

सप्तमः पाठः

Lesson –7

वैदिकविज्ञानम् 7

आधुनिककाले येन विज्ञानेन वयं सुखेन भवामः, तत्र अस्माकं पूर्वजानां योगदानं मुख्यतमं विद्यते। ते एव विज्ञानाविष्काराय प्रप्रथमतया प्रयासं चक्रुः। के ते पूर्वजाः, तेषां योगदानं च किं भवतीति अस्मिन् पाठ्यभागे विशदीक्रियते।।





कदाचित् स्वाति नामकः ऋषिः पिपासाकुलः सन् कुत्रचित् जलम् अन्विष्टवान्। तदा सः कञ्चन आह्लादकरं शब्दं श्रुत्वा तदन्वेषयितुम् अगच्छत्। तत्र जलबिन्दवः पर्वतात् पतन्तः सन् शुष्कपर्णानाम् उपरि अपतन्। तदा मधुरं संगीतम् उद्भूतम्। तद्विज्ञाय सः पिपासाकुलतां विस्मृत्य सवेगं स्वकुटीरम् आगच्छत्। सः संगीतसाधनेषु प्रतिध्वनेः उत्पादयितुं सूक्ष्मक्रमम् अन्वेषयति स्म। एवं रूपेण तेन यत् सङ्गीतसाधनं निर्मितं तस्य नाम मृदङ्ग इति अभवत्।

न केवलं ऋषीणां विज्ञानं तावदेव वक्तुं पार्यते। अपि तु गणितं, रसायनं, भौतिकं, धनुर्वेदः, आयुर्वेदः, भूविज्ञानं, नक्षत्रविज्ञानं, विमानविज्ञानम् इत्यादीनां विषये सम्यक् अध्ययनं कृत्वा महत्वपूर्णाः सिद्धयः प्राप्ताः।

Unit 7.indd 39 06-06-2018 15:20:43



तपोधनः पराशरः वृक्षायुर्वेदम् अरचयत्। तत्र पर्णैः क्रियमाणाः विविधाः क्रियाः वर्णितवान्। यथा प्रकाशनिस्सारणप्रक्रिया, पर्णकणेषु स्थिता प्लाज्मा, बीजनिर्माणम् इत्यादयः विषयाः समुपवर्णिताः।

बोधायनाचार्येण शुल्बसूत्रेषु निरूपितः सिद्धान्त एव अधुना रेखागणिते 'पितागरस्' इति नामा प्रसिद्धः सञ्जातः दृश्यते।



इत्थं ऋषीणां विज्ञानम् अतिमहत्वपूर्णं मानवीयमूल्ययुक्तं चासीत्। तेषां विज्ञानं 'सर्वे भवन्तु सुखिनः, सर्वे भद्राणि पश्यन्तु' इत्याद्युक्तेः अनुसारं सर्वजनानां हिताय सर्वजनानां सुखाय च आसीत्।।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. पिपासा	-	_____	2. बिन्दवः	-	_____
3. शुष्कः	-	_____	4. पर्णम्	-	_____
5. प्रतिध्वनिः	-	_____	6. मृदङ्गः	-	_____
7. वृक्षः	-	_____	8. कणः	-	_____
9. सिद्धान्तः	-	_____	10. भद्राणि	-	_____

Unit 7.indd 40 06-06-2018 15:20:43

II. अधः प्रदत्तानां शब्दानां व्यतिरेकपदानि लिखत-

1. आकुलः	x	_____	2. कुत्रचित्	x	_____
3. उपरि	x	_____	4. उद्भूतम्	x	_____
5. मधुरम्	x	_____	6.विस्मृत्य	x	_____
7.प्रसिद्धः	x	_____	8. हिताय	x	_____
9. सुखाय	x	_____	10. भद्राणि	x	_____

III. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. कः पिपासाकुलः सन् जलम् अन्विष्टवान्?
2. सः किमन्वेषयितुम् अगच्छत्?
3. के शुष्कपर्णानाम् उपरि अपतन्?
4. सः किम् उत्पादयितुं सूक्ष्मक्रमम् अन्वेषयति स्म?
5. स्वातिनामकेन मुनिना निर्मितस्य सङ्गीतसाधनस्य नाम किम् ?
6. कः वृक्षायुर्वेदम् अरचयत्?
7. शुल्बसूत्राणि केन विरचितानि?
8. शुल्बसूत्रेषु निरूपितः सिद्धान्तः रेखागणते किमिति प्रसिद्धः?
9. वैदिकीयं विज्ञानं कीदृशम् आसीत्?
10. सर्वे कीदृशाः भवन्तु?

IV. सविस्तरम् उत्तरं लिखत-

1. मृदङ्गः केन कथम् उत्पन्नः ? विशदयत ।
2. वैदिकीयविज्ञानस्य महत्वं वर्णयत।

Unit 7.indd 41 06-06-2018 15:20:43

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

वैज्ञानिकः तेषां कृतिश्च –

1. भारद्वाजः	-	यन्त्रसर्वस्वम्
2. वराहमिहिरः	-	बृहत्संहिता
3. भाकराचार्यः	-	लीलावती
4. आर्यभट्टः	-	आर्यभटीयम्
5. भोजः	-	समराङ्कणसूत्रम्
6. चरकः	-	चरकसंहिता
7. गर्गः	-	गर्गसंहिता
8. सुश्रुतः	-	सुश्रुतसंहिता
9. पतञ्जलिः	-	योगसूत्रम्
10. चाणक्यः	-	अर्थशास्त्रम्

Unit 7.indd 42 06-06-2018 15:20:43

अष्टमः पाठः

Lesson – 8

सुन्दरं भारतम्

8

विश्वे विद्यमानेषु देशेषु भारतं तु महत्वपूर्णं कथ्यते। न केवलम् आचारदृष्ट्यैव महत्वं भवति। तत्र विद्यामानानि स्थानानि, पवित्रतमाः नद्यः च भारतं लावण्ययुक्तं कुर्वन्ति।।



अस्माकं देशः भारतवर्षम् (भारतदेशः) इंडिया इत्यादि नामभिः प्रसिद्धः । संप्रति अस्य नाम 'भारतम्' इत्येव राज्यद्वारा स्वीकृतं नाम अस्ति ।

देशोऽयं काश्मीरात् कन्याकुमारी पर्यन्तम्, कच्छात् च बंगपर्यन्तं सुविस्तृतः अस्ति। अस्य उत्तरस्यां दिशि नगाधिराजः हिमालयः अस्ति । अयं संसारे सर्वेषु पर्वतेषु श्रेष्ठः अस्ति । अत एव जनैः अयं 'पर्वतराजः' इति वा 'नगाधिराजः' इति वा कथ्यते ।



Unit 8.indd 43 06-06-2018 15:22:16

हिमालयात् गङ्गा, यमुना, शतद्रुः, चन्द्रभागा, वितस्ता इत्यादिकाः नद्यः प्रभवन्ति।



भारतस्य पूर्वे भागे बंगसागरः, पश्चिमे भागे अरबसागरः दक्षिणे च भागे हिन्दुमहासागरः विद्यते।

सांप्रतं भारते एकोनत्रिंशत् राज्यानि सन्ति। भारतस्य राजधानी 'दिल्ली' नगरम् अस्ति। अस्याः गणना विश्वस्य विशालासु नगरीषु क्रियते। भारते तु एषा कल्कत्ता – मुम्बई नगर्योः अनन्तरं विशालतमा नगरी। पुरा अस्याः नाम 'इन्द्रप्रस्थम्' इति अभवत्।

अत्र एव संसद्-भवनम्, राष्ट्रपति-भवनम् च स्तः। इयं पुरी यमुनायाः दक्षिणे तटे विराजते। अत्र अगणितानि दर्शनीयानि स्थानानि वर्तन्ते। कुतुब-स्तम्भः, लौहस्तम्भः, पाण्डवानां दुर्गं, पुरातन-दुर्गं, रक्तदुर्गं इत्यादीनि।





Unit 8.indd 44 06-06-2018 15:22:17





नवीनेषु स्थानेषु राष्ट्रपतिभवनम्, संसद्भवनम्, केन्द्रीयः सचिवालयः, विज्ञानभवनम्, उद्योगभवनम्, रवीन्द्रभवनम् प्रभृतीनि अनेकानि द्रष्टव्यानि स्थानानि वर्तन्ते ।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. देशः	-	_____	2. नाम	-	_____
3. नगः	-	_____	4. नद्यः	-	_____
5. सागरः	-	_____	6. राजधानी	-	_____
7. तटम्	-	_____	8. पुरातनम्	-	_____
9. दुर्गम्	-	_____	10. अनन्तरम्	-	_____

II. अधः प्रदत्तानां शब्दानां व्यतिरेकपदानि लिखत-

1. प्रसिद्धः	x	_____	2. विस्तृतः	x	_____
3. श्रेष्ठः	x	_____	4. पूर्वे	x	_____
5. दक्षिणे	x	_____	6. विशालासु	x	_____
7. पुरा	x	_____	8. अगणितानि	x	_____
9. नवीनेषु	x	_____	10. द्रष्टव्यानि	x	_____

III. पूरयत-

1. अस्माकं देशः _____ इत्यादि नामभिः प्रसिद्धः ।
2. उत्तरस्यां दिशि _____ अस्ति।
3. भारतस्य दक्षिणे भागे _____ विद्यते ।

Unit 8.indd 45 06-06-2018 15:22:17

4. भारतस्य राजधानी _____ नगरम् अस्ति।

5. पुरा अस्याः नाम _____ इतिअभवत् ।

IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. अस्माकं देशस्य नाम किम् ?
2. भारतस्य उत्तरस्यां दिशि किम् अस्ति ?
3. हिमालयात् काः नद्यः प्रवहन्ति ?
4. भारते कति राज्यानि सन्ति ?
5. भारतस्य चतसृषु दिक्षु किं किम् अस्ति ?
6. भारतस्य राजधानी का भवति ?
7. दिल्ली नगरं कस्याः तटे विराजते ?
8. राजधान्यां दर्शनीयानि स्थानानि कानि वर्तन्ते ?

V. सविस्तरम् उत्तरं लिखत-

1. भारते किं किम् अस्ति ? – विवृणुत ।
2. दिल्ली-नगरम् अधिकृत्य यथाग्रन्थं लिखत ।

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

पर्वतः (विष्णुपुराणतः) –

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः।।

हिमालयः –

अस्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधीवगाह्य
स्थितः पृथिव्या इव मानदण्डः ।।

नद्यः –

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।।

Unit 8.indd 46 06-06-2018 15:22:17

गङ्गा –

गङ्गा गङ्गे च यो ब्रूयात्
योजनानां शतैरपि।
मुच्यते सर्वपापेभ्यः
विष्णुलोकं स गच्छति।।

पुण्यपट्टणानि –

अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्ती पुरी, द्वारवती इति मोक्षप्रदानि पुण्यस्थलानि भवन्ति।

वाराणसी –

वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिमखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु कीदृक् ।।

अ	आ	उ	ओ
अरुणाचलप्रदेशः असामराज्यम्	आन्ध्रप्रदेशराज्यम्	उत्तरप्रदेशराज्यम् उत्तराखण्डराज्यम्	ओडिशाराज्यम्
क	**ग**	**छ**	**ज**
कर्णाटकराज्यम् केरलराज्यम्	गुजरातराज्यम् गोवाराज्यम्	छत्तीसगढराज्यम्	जम्मू-काश्मीरराज्यम्
झ	**त**	**द**	**न**
झारखण्डराज्यम्	तमिळनाडुराज्यम् तेलङ्गाणाराज्यम् त्रिपुराराज्यम्	देहलीराज्यम्	नागालैण्डराज्यम्
प	**ब**	**म**	**र**
पञ्जाबराज्यम् पश्चिमवङ्गराज्यम्	बिहारराज्यम्	मध्यप्रदेशराज्यम् महाराष्ट्रराज्यम् मिजोरामराज्यम् मेघालयराज्यम्	राजस्थानराज्यम्
स	**ह**		
सिक्किमराज्यम्	हरियाणाराज्यम् हिमाचलप्रदेशः		

Unit 8.indd 47 06-06-2018 15:22:17



व्याकरणम् - 4

धातुः – आत्मनेपदी – लङ् लकारः

1. एध्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	ऐधत	ऐधेताम्	ऐधन्त
मध्यमपुरुषः	ऐधथाः	ऐधेथाम्	ऐधध्वम्
उत्तमपुरुषः	ऐधे	ऐधावहि	ऐधामहि

2. वन्द्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अवन्दत	अवन्देताम्	अवन्दन्त
मध्यमपुरुषः	अवन्दथाः	अवन्देथाम्	अवन्दध्वम्
उत्तमपुरुषः	अवन्दे	अवन्दावहि	अवन्दामहि

3. लभ्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अलभत	अलभेताम्	अलभन्त
मध्यमपुरुषः	अलभथाः	अलभेथाम्	अलभध्वम्
उत्तमपुरुषः	अलभे	अलभावहि	अलभामहि

Unit 8.indd 48 06-06-2018 15:22:17

4. रम्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अरमत	अरमेताम्	अरमन्त
मध्यमपुरुषः	अरमथाः	अरमेथाम्	अरमध्वम्
उत्तमपुरुषः	अरमे	अरमावहि	अरमामहि

5. यत्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अयतत	अयतेताम्	अयतन्त
मध्यमपुरुषः	अयतथाः	अयतेथाम्	अयतध्वम्
उत्तमपुरुषः	अयते	अयतावहि	अयतामहि

6. मुद्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अमोदत	अमोदेताम्	अमोदन्त
मध्यमपुरुषः	अमोदथाः	अमोदेथाम्	अमोदध्वम्
उत्तमपुरुषः	अमोदे	अमोदावहि	अमोदामहि

Unit 8.indd 49 06-06-2018 15:22:18

नवमः पाठः

Lesson – 9

दूतलक्षणम्

9

राजानां मुख्यं कर्म देशरक्षणम्। तत्तु दूतस्य साहाय्येन साध्यं भवति। यतो हि राजानः दूतमुखाः भवन्ति। अतः दूतस्य मुख्यतां प्रतिपादयति अयं पाठ्यभागः। विषयोऽयं महाभारतस्य वनपर्वणः स्वीकृतः।

द्यूतक्रीडायां पराजिताः पाण्डवाः राज्यभ्रष्टाः सन् द्वैताख्ये तपोवने निवासं चक्रुः । तदा युधिष्ठिरः दुर्योधनस्य कीदृशः व्यवहारः?, दुर्योधनः प्रजां सम्यक् पालयति न वा, तस्मिन् प्रजाः अनुरक्ताः न वा इदं सर्वं विज्ञातुम् एकं किरातं दूतरूपेण हस्तिनापुरं प्रेषितवान् ।



ब्रह्मचारिवेषधारी सः किरातः दुर्योधनस्य राज्यस्य सर्वं वृत्तान्तं ज्ञात्वा द्वैतवने युधिष्ठिरं प्रत्यागतः । युधिष्ठिरं सः कथयति - "हे राजन् ! कार्येषु नियुक्तः भृत्यः न प्रतारणीयः । उक्तञ्च –

साकरो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः ।

परचित्तावगन्ता च राज्ञो दूतः स इष्यते ।।

Unit 9.indd 50 06-06-2018 15:22:56

यथा कश्चिदपि पुरुषः यत् चक्षुषा पश्यति तदेव प्रमाणीकरोति तथा यद् दूतेन उच्यते तदेव प्रमाणीकुर्वन्ति। अतः शत्रोः दुर्योधनस्य विषये मम सत्यभूतं वचनम् अप्रियं भवतु प्रियं वा भवतु तद् भवता क्षम्यताम्। यतः हितकरं तथैव सद्यः मनोहरं वचनं दुर्लभं भवति" इति।

लोके मधुरं वचनं सर्वेभ्यः सुखकारकं भवति। सर्वे मनुष्याः मधुरमेव श्रोतुमिच्छन्ति न कर्कशम्। परन्तु मधुरं वचनं प्रायशः हितकरं न भवति, तथा हितकरं वचनं च श्रवणे मधुरं न जायते। व्यवहारे तु यत्सत्यं तद् हितकरं तदवश्यमेव कठोरं भवति। अत एव भारविना उक्तम् – किरातार्जुनीये "हितं मनोहारि च दुर्लभं वचः" इति।।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. द्यूतक्रीडा - _____
2. तपोवनम् - _____
3. प्रजाः - _____
4. सम्यक् - _____
5. दूतः - _____
6. किरातः - _____
7. वृत्तान्तम् - _____
8. भृत्यः - _____
9. चक्षुः - _____
10. शत्रुः - _____
11. सद्यः - _____
12. कर्कशम् - _____
13. व्यवहारः- _____
14. कठोरम् - _____
15. वाग्मी - _____
16. चित्तम् - _____

II. अधः प्रदत्तानां शब्दानां व्यतिरेकपदानि लिखत-

1. पराजिताः x _____
2. ज्ञात्वा x _____
3. शत्रुः x _____
4. प्रियम् x _____
5. हितकरम् x _____
6. दुर्लभम् x _____
7. सुखकारकम्x _____
8. मधुरम् x _____
9. कर्कशम् x _____
10. सत्यम् x _____

Unit 9.indd 51 06-06-2018 15:22:56

III.पाठात् समुचितम् उत्तरं स्वीकृत्य रिक्तस्थानानि पूरयत-

1.पाण्डवाः राज्यभ्रष्टाः सन् _____ निवासं चक्रुः ।

2. एकं किरातं _____ प्रेषितवान् ।

3. कार्येषु नियुक्तः _____ न प्रतारणीयः ।

4. हितकरं तथैव _____ दुर्लभं भवति ।

5. राज्ञो _____ स इष्यते ।

IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. द्यूतक्रीडायां के पराजिताः ?

2. राज्यभ्रष्टाः पाण्डवाः कुत्र निवासं चक्रुः ?

3. दुर्योधनस्य व्यवहारं ज्ञातुं युधिष्ठिरः कं दूतरूपेण प्रेषितवान् ?

4. कः कार्येषु नियुक्तः न प्रतारणीयः ?

5. लोके किं सर्वेभ्यः सुखकारकं भवति ?

6. हितकरं वचनं श्रवणे किं न जायते ?

7. किरातार्जुनीये भारविना किमुक्तम् ?

8. सर्वे मनुष्याः किं श्रोतुमिच्छन्ति ?

9. सर्वे मनुष्याः किं न श्रोतुमिच्छन्ति ?

10. दूतस्य लक्षणं किम् ?

V. सविस्तरम् उत्तरं लिखत-

1. दूतस्य उक्तिं यथाग्रन्थं संक्षिप्य लिखत।

Unit 9.indd 52 06-06-2018 15:22:56

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

किरातार्जुनीये वनेचरवाक्यम् -

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।
द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे।।
क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।।

रामायणे रामस्य दृष्ट्या दूतः –

एवंविधो यस्य दूतो
न भवेत्पार्थिवस्य तु।
सिद्ध्यन्ति हि कथं तस्य
कार्याणां गतयोऽनघ।।

एवं गुणगणैर्युक्ता
यस्य स्युः कार्यसाधिकाः।
तस्य सिद्ध्यन्ति सर्वार्था
दूतवाक्यप्रचोदिताः।।

Unit 9.indd 53 06-06-2018 15:22:56

दशमः पाठः

Lesson – 10

हेमन्तवर्णनम्

10

अयं पाठ्यभागः वाल्मीकि-महाकविना विरचितात् रामायण-काव्यात् स्वीकृतः। रामस्य वनवासप्रसङ्गे प्रकृतेः वर्णनं महाकविना अत्युद्भुतं कृतम्। तत्र ऋतोः वर्णनं पठितॄणां श्रोतॄणां च मनः आकर्षयति। तत्रापि हेमन्त-ऋतोः वर्णनं अति चमत्कारं जनयति।

नीहारपरुषो लोकः
पृथिवी सस्यमालिनी ।
जलान्यनुपभोग्यानि
सुभगो हव्यवाहनः ।। 1

सेवमाने दिशं सूर्ये
दृढमन्तकसेविताम् ।
विहीनतिलकेव स्त्री
नोत्तरा दिक् प्रकाशते ।। 2



Unit 10.indd 54 06-06-2018 15:23:47

प्रकृत्या हिमकोषाढ्यः
दूरसूर्यश्च साम्प्रतम् ।
यथार्थनामा सुव्यक्तं
हिमवान् हिमवान् गिरिः ।। 3

मृदुसूर्याः सुनीहाराः
पटुशीताः समाहिताः।
शून्यारण्या हिमध्वस्ता
दिवसा भान्ति साम्प्रतम् ।। 4

रविसङ्क्रान्तसौभाग्यः
तुषारारुण–मण्डलः ।
निश्वासान्ध इवादर्शः
चन्द्रमा न प्रकाशते ।। 5

प्रकृत्या शीतलस्पर्शः
हिमवृद्धश्च साम्प्रतम्।
प्रवाति पश्चिमो वायुः
काले द्विगुणशीतलः ।। 6

स्पृशन् सुविपुलं शीतम्
उदकं द्विरदः सुखम् ।
अत्यन्ततृषितो वन्यः
प्रतिसंहरते करम् ।। 7

एते हि समुपासीनाः
विहगाः जलचारिणः ।
न गाहन्ते जलं स्वच्छम्
अप्रगल्भा इवाहवम् ।। 8

Unit 10.indd 55 06-06-2018 15:23:47

तुषारपतनाच्चैव
मृदुत्वाद् भास्करस्य च ।
शैत्यादगाग्रस्थमपि
प्रायेण रसवज्जलम् ।। 9

जराजर्जरितैः पत्रैः
शीर्णकेसरकर्णिकैः ।
नालशेषा हिमध्वस्ता
न भान्ति कमलाकराः ।। 10

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. परुषः - _____
2. लोकः - _____
3. सूर्यः - _____
4. तिलकम् - _____
5. स्त्री - _____
6. दिक् - _____
7. हिमवान् - _____
8. गिरिः - _____
9. अरण्यम् - _____
10. दिवसाः - _____
11. उदकम् - _____
12. शीतम् - _____
13. सुखम् - _____
14. पत्रम् - _____
15. विहगाः - _____

II. सन्धिच्छेदं कुरुत-

1. जलान्यनुपभोग्यानि - _____+ _____
2. तिलकेव - _____+ _____

Unit 10.indd 56 06-06-2018 15:23:47

3. सूर्यश्च - _____+ _____

4. शून्यारण्याः - _____+ _____

5. इवादर्शः - _____+ _____

III. सन्धत्त-

1. हिमवृद्धाः + च = _____

2. इव + आहवम् = _____

3. पतनात् + चैव = _____

4. रसवत् + जलम् = _____

5. कमल + आकराः = _____

IV. श्लोकं पूरयत-

1. _____ लोकः,

_____ सस्यमालिनी ।

_____

सुभगो हव्यवाहनः ।।

2. _____ सुनीहाराः

_____समाहिताः ।

शून्यारण्या _____

_____ भान्ति साम्प्रतम् ।।

3. प्रकृत्या _____

_____ साम्प्रतम् ।

प्रवाति _____ वायुः

काले _____ ।।

Unit 10.indd 57 06-06-2018 15:23:47

4. तुषार _____

मृदुत्वाह _____ ।

_____

प्रायेण रसवज्जलम् ।।

5. जराजर्जरितैः _____

_____ ।

नालशेषा हिमध्वस्ता

न भान्ति _____।।

V. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. कस्य ऋतोः वर्णनं अत्र कृतमस्ति ?

2. पृथिवी कीदृशी भवति ?

3. उत्तरा दिक् कथमिव न प्रकाशते ?

4. दिवसाः कथं भान्ति?

5. चन्द्रमाः कथमिव न प्रकाशते ?

6. काले द्विगुणशीतलः कः ?

7. के समुपासीनाः सन्ति?

8. कस्य मुदुत्वं भवति?

9. कानि अनुपभोग्यानि भवन्ति ?

10. कस्य यथार्थनामा सुव्यक्तम्?

Unit 10.indd 58 06-06-2018 15:23:47

VI. सविस्तरम् उत्तरं लिखत

1. यथाग्रन्थं हेमन्त-ऋतोः वर्णनं कुरुत ।

VII. ससन्दर्भं भावं लिखत

1. हिमवान् हिमवान् गिरिः ।

2. चन्द्रमा न प्रकाशते ।

3. नोत्तरा दिक् प्रकाशते ।

4. अप्रगल्भा इवाहवम् ।

5. न भान्ति कमलाकराः ।

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

षट् ऋतवः –

अस्माकम् भारते वर्षे प्रतिवर्षम् प्रायः षण्णाम् ऋतूणाम् समागमनं भवति । ते – वसन्तः, ग्रीष्मः, वर्षा, शिशिरः, शरद् ,हेमन्तः, च ।

वसन्तः –

अयं हि रुचिरस्तस्याः कालो रुचिरकाननः।
कोकिलाकुलसीमान्तः दयिताया ममानघ।।

अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः।
स्वैः पक्षैः पवनोद्धूतैः गवाक्षैः स्फाटिकैरिव।।

पादपात् पादपं गच्छन् शैलाच्छैलं वनाद्वनम्।
वाति नैकरसास्वादः संमोदित इवानिलाः।।

शिशिरः –

पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे।
पुष्पभारसमृद्धानां वनानां शिशिरात्यये।।

Unit 10.indd 59 06-06-2018 15:23:47

रुचिराणि अपि पुष्पाणि पादपानां अतिश्रया।
निष्फलानि महीं यान्ति समं मधुकरोत्करैः।।

वर्षऋतुः-

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गाः।।

नीलेषु नीला नववारिपूर्णा
मेघेषु मेघा प्रतिभान्ति सक्ताः।
दावाग्निदग्धेषु दावाग्निदग्धाः
शैलेषु शैला इव बद्धमूलाः।।

व्याकरणम् - 5

अजन्तनपुंसकलिङ्गशब्दाः

1. अकारान्तः नपुंसकलिङ्गः ज्ञान शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वितीया	ज्ञानम्	ज्ञाने	ज्ञानानि
तृतीया	ज्ञानेन	ज्ञानाभ्यां	ज्ञानैः
चतुर्थी	ज्ञानाय	ज्ञानाभ्यां	ज्ञानेभ्यः
पञ्चमी	ज्ञानात्	ज्ञानाभ्यां	ज्ञानेभ्यः
षष्ठी	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
सप्तमी	ज्ञाने	ज्ञानयोः	ज्ञानेषु
संबोधन-प्रथमा	हे ज्ञान !	हे ज्ञाने !	हे ज्ञानानि !

Unit 10.indd 60 06-06-2018 15:23:47

2. अकारान्तः नपुंसकलिङ्गः फल शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	फलम्	फले	फलानि
द्वितीया	फलम्	फले	फलानि
तृतीया	फलेन	फलाभ्यां	फलैः
चतुर्थी	फलाय	फलाभ्यां	फलेभ्यः
पञ्चमी	फलात्	फलाभ्यां	फलेभ्यः
षष्ठी	फलस्य	फलयोः	फलानाम्
सप्तमी	फले	फलयोः	फलेषु
संबोधन-प्रथमा	हे फल !	हे फले !	हे फलानि !

3. इकारान्तः नपुंसकलिङ्गः वारि शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वारि	वारिणी	वारीणि
द्वितीया	वारि	वारिणी	वारीणि
तृतीया	वारिणा	वारिभ्यां	वारिभिः
चतुर्थी	वारिणे	वारिभ्यां	वारिभ्यः
पञ्चमी	वारिणः	वारिभ्यां	वारिभ्यः
षष्ठी	वारिणः	वारिणोः	वारीणाम्
सप्तमी	वारिणि	वारिणोः	वारिषु
संबोधन-प्रथमा	हे वारे !, हे वारि !	हे वारिणी !	हे वारीणि !

Unit 10.indd 61 06-06-2018 15:23:47

4. उकारान्तः नपुंसकलिङ्गः मधु शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मधु	मधुनी	मधूनि
द्वितीया	मधु	मधुनी	मधूनि
तृतीया	मधुना	मधुभ्यां	मधुभिः
चतुर्थी	मधुने	मधुभ्यां	मधुभ्यः
पञ्चमी	मधुनः	मधुभ्यां	मधुभ्यः
षष्ठी	मधुनः	मधुनोः	मधूनाम्
सप्तमी	मधुनि	मधुनोः	मधुषु
संबोधन-प्रथमा	हे मधो !, हे मधु !	हे मधुनी !	हे मधूनि !

5. ऋकारान्तः नपुंसकलिङ्गः कर्तृ शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कर्तृ	कर्तृणी	कर्तॄणि
द्वितीया	कर्तृ	कर्तृणी	कर्तॄणि
तृतीया	कर्तृणा	कर्तृभ्यां	कर्तृभिः
चतुर्थी	कर्तृणे-कत्रे	कर्तृभ्यां	कर्तृभ्यः
पञ्चमी	कर्तृणः-कर्तुः	कर्तृभ्यां	कर्तृभ्यः
षष्ठी	कर्तृणः-कर्तुः	कर्तृणोः-कर्त्रोः	कर्तॄणाम्
सप्तमी	कर्तृणि-कर्तरि	कर्तृणोः-कर्त्रोः	कर्तृषु
संबोधन-प्रथमा	हे कर्तृ !	हे कर्तृणी !	हे कर्तॄणि !

Unit 10.indd 62 06-06-2018 15:23:47

एकादशः पाठः

Lesson – 11

लोकविज्ञानम् 11

विश्वमिदम् इदानींतनकाले विज्ञानमयं सञ्जातं विद्यते। विज्ञानं विना न किमपि कार्यं सुलभतया साधयितुं शक्यते। अतः अस्मिन् पाठ्यभागे विज्ञानस्य महत्वं, आवश्यकता च मानवजीवने कथम् उपयोगाय कल्पते इति यत्किञ्चित् वर्णितं विद्यते।

भौतिकानां पदार्थानां विशेषतः ज्ञानं विज्ञानम् इति कथ्यते । यः पदार्थानां विशेषाणां गुणानाम् अन्वेषणं करोति सः तेषां विशिष्टां शक्तिं ज्ञातुं योग्यः भवति । तं वैज्ञानिकः इति जनाः वदन्ति ।

आधुनिकेन विज्ञानेन संसारस्य स्वरूपमेव परिवर्तितम्। अद्य विद्युता रेलयन्त्रम् चाल्यते, पेट्रोलेन मोटर-यानं वायुयानं च। विद्युता प्रकाशः क्रियते, व्यजनानि वीज्यन्ते, नानायन्त्राणि च चाल्यन्ते । विज्ञानस्य कृपया अधुना मनुष्यः एकेन होराकालेन क्रोशानां सहस्राणां यात्रां कर्तुं अर्हति।



आकाशवाण्या शब्दस्य दूरसंचारणं क्रियते । एतेन साधनेन अद्य वयं विश्वस्य समाचारान्, गीतानि, वाद्यानि, भाषणानि च श्रोतुं समर्थाः स्मः । विज्ञानस्यैव कृपया वयं चलचित्राणि द्रष्टुं समर्थाः,'एक्सरे' इत्यस्य अयं चमत्कारः यत् वयं शरीरान्तरे अस्थिगतमपि दोषं ज्ञातुं समर्थाः ।





Unit 11.indd 63 06-06-2018 15:25:28

अणुवीक्षण-यन्त्रेण वयं सूक्ष्मतमं वस्तुजातं द्रष्टुं शक्नमः । दूरवीक्षणयन्त्रेण वयं ग्रहनक्षत्राणि द्रष्टुमर्हाः । विज्ञानेन परमाणोरपि तत्त्वं परिज्ञातम् ।

अद्य तु राकेटादियन्त्राणि प्रेषयित्वा मनुजस्य चन्द्रलोकम् अपि गमनं सम्भवम् ।

इत्थं विज्ञानं लोकोपकारकं भवति ।।



अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. विज्ञानम्	-	_____	2. वैज्ञानिकः	-	_____
3. संसारः	-	_____	4. रेलयन्त्रम्	-	_____
5. विद्युत्	-	_____	6. व्यजनम्	-	_____
7. यन्त्राणि	-	_____	8. होरा	-	_____
9. आकाशवाणी	-	_____	10. समाचारः	-	_____
11. गीतानि	-	_____	12. वाद्यानि	-	_____

II. अधः प्रदत्तानां शब्दानां व्यतिरेकपदानि लिखत-

1. अन्वेषणम्	X	_____	2. योग्यः	X	_____
3. प्रकाशः	X	_____	4. अधुना	X	_____
5. अद्य	X	_____	6. समर्थाः	X	_____
7. अर्हाः	X	_____	8. सूक्ष्मः	X	_____
9. प्रेषयित्वा	X	_____	10. उपकारकम्	X	_____

III. पाठात् समुचितम् उत्तरं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. भौतिकानां पदार्थानां विशेषतः ज्ञानं _____ इति कथ्यते ।

2. _____ संसारस्य स्वरूपमेव परिवर्तितम् ।

Unit 11.indd 64 06-06-2018 15:25:28

3. एकेन होराकालेन क्रोशानां _____ कर्तुम् अर्हति ।

4. _____ शब्दस्य दूरसंचारणं क्रियते ।

5. विज्ञानेन _____ तत्त्वं परिज्ञातम् ।

IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. विज्ञानं नाम किम् ?

2. कं वैज्ञानिकाः इति जनाः वदन्ति?

3. केन रेलयन्त्रं चाल्यते ?

4. आकाशवाण्याः कस्य दूरसंचारणं क्रियते?

5. आकाशवाण्या वयं कानि श्रोतुं समर्थाः स्मः?

6. 'एक्सरे' इत्यनेन वयं किं ज्ञातुं समर्थाः स्मः ?

7. अणुवीक्षणयन्त्रेण किं द्रष्टुं शक्नुमः?

8. केन वयं ग्रहनक्षत्राणि द्रष्टुम् अर्हाः?

9. कथं मनुजस्य चन्द्रलोकम् अपि गमनं सम्भवम्?

10. विज्ञानं कीदृशं भवति?

V. सविस्तरम् उत्तरं लिखत-

1. विज्ञानस्य प्रयोजनानि कानि? विशदयत ।

Unit 11.indd 65 06-06-2018 15:25:28

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

उपसर्गः–

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहार-विहार-परिहारवत्।

संस्कृते द्वाविंशतिः उपसर्गाः सन्ति। ते - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ् (आ), नि, अधि, अपि, अति, सु, उत् /उद्, अभि, प्रति, परि तथा उप।

अति	excessive, surpassing, over, beyond
अधि	above, additional, upon
अनु	after, behind, along, near, with, orderly
अप	away, off, back, down, negation, bad, wrong
अप	away, off, back, down, negation, bad, wrong
अपि	placing over, uniting, proximity, in addition to
अभि	intensive, over, towards, on, upon
अव	down, off, away
आ	towards, near, opposite, limit, diminutive
उत्, उद्	up, upwards, off, away, out, out of, over
उप	near, inferior, subordinate, towards, under, on
दुस्, दुर्, दुः	bad, hard, difficult, inferior
नि	negation, in, into, down, back
निस्, निर्, निः	negative, out, away, forth, intensive
परा	away, off, aside
परि	round, about, fully
प्र	forth, on, onwards, away, forward, very, excessive, great
प्रति	towards, against, upon, in return,back, every
वि	without, apart, away, opposite, intensive, different
सम्	with, together, completely
सु	good, well, easy

Unit 11.indd 66 06-06-2018 15:25:28

द्वादशः पाठः

Lesson – 12

तत् त्वम् असि 12

अयं पाठ्यविषयः छान्दोग्योनिषदः षष्ठाध्यायात् सङ्कलितः। अत्र आरुणिः स्वपुत्रं श्वेतकेतुं दृष्टान्तपूर्वकं आत्मतत्वस्य रहस्यम् उपदिशति।

श्वेतकेतुः नाम कश्चित्, महर्षेः आरुणेः पुत्रः अभवत्। तस्य द्वादशवर्षसमये पिता पुत्रम् आह – हे श्वेतकेतो! अध्ययनाय आचार्यसमीपं गच्छ इति। सः चतुर्विंशतिवर्षं यावत् कस्मिंश्चित् गुरोः सकाशे अर्थेन सहितान् सर्वान् वेदान् अधीतवान्। पश्चात् सः अत्यन्तगर्वयुक्तः स्वं श्रेष्ठतमं मन्यमानः पितुः समीपम् आगच्छत्।

एतादृशं पुत्रम् अवलोक्य पिता अवोचत् यत् – हे पुत्र! आचार्यात् किं विशिष्टं ज्ञानं प्राप्तं, येन त्वं अविनयेन वर्तसे। अपि च गर्वितः असि। किं जानासि त्वं यत् – येन श्रुतेन अश्रुतमपि श्रुतं भवति, अमतं मतं भवति, अविज्ञातं च विज्ञातं भवति इति। तदतिशयकरं प्रश्नं श्रुत्वा पितरम् आह – कथमेतत् सम्भवम् इति। तदा पिता अधः प्रदत्तदृष्टान्तेन तत्वं प्रतिपादयति-



Unit 12.indd 67 06-06-2018 15:26:26

आरुणिः - पुत्र ! वृक्षात् फलम् आनय।

श्वेतकेतुः - आनीतं पितः।

आरुणिः - अत्र किम् अवलोकयसि ?

श्वेतकेतुः - अल्पानि बीजानि ।

आरुणिः - इतः एकं बीजं भिन्नं कुरु ।

श्वेतकेतुः - भिन्नं कृतम्।

आरुणिः - अत्र किम् अवलोकयसि ?

श्वेतकेतुः - न किञ्चत् भोः।

एतत् श्रुत्वा आरुणिः श्वेतकेतुम् आह – हे पुत्र! अस्मात् बीजात् एव महान् सशाखः वृक्षः समुत्पन्नः विद्यते। एवमेव अणिम्नः इदं जगत् उद्भूतं भवति। जानातु पुत्र! स एव आत्मा भवति । तत् एव सत् भवति । तत् त्वम् असि ।।

अभ्यासः

I. अधो लिखितानां शब्दानाम् अर्थं लिखत-

1. आचार्यः	-	_____	2. द्वादश	-	_____
3. समीपं	-	_____	4. चतुर्विंशतिः	-	_____
5. अधीतवान्	-	_____	6. श्रेष्ठतमं	-	_____
7. मन्यमानः	-	_____	8. गर्वितः	-	_____
9. आह	-	_____	10. बीजम्	-	_____

II. अधो लिखितानां पदानां व्यतिरेकपदानि लिखत-

1. आचार्यः	X	_____	2. गच्छ	X	_____
3. अर्थम्	X	_____	4. समीपम्	X	_____
5. श्रुतम्	X	_____	6. अमतम्	X	_____

Unit 12.indd 68 06-06-2018 15:26:26

7. विज्ञातम् X _____ 8. भिन्नम् X _____

9. त्वम् X _____ 10. पिता X _____

III. वर्णविन्यासं कुरुत-

1. पुत्रः = प् + उ + त् + र् + अ + :

2. सकाशे = _____

3. श्वेतकेतुः = _____

4. आरुणिः = _____

5. अहम् = _____

6. विशिष्ठम् = _____

7. जानासि = _____

8. कथम् = _____

9. अल्पानि = _____

10. त्वम् = _____

IV. पाठात् समुचितम् उत्तरं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. महर्षेः आरुणेः पुत्रः _____ आसीत् ।

2. अध्ययनाय _____गच्छ ।

3. सः _____ स्वं श्रेष्ठतमं मन्यमानः।

4. किं विशिष्टं _____ प्राप्तम् ।

5. एवमेव _____इदं जगद् उद्भूतं भवति ।

V. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. महर्षेः आरुणेः पुत्रः कः आसीत् ?

2. आरुणिं श्वेतकेतुं अध्ययनार्थं कं प्रति गन्तुम् आदिदेश ?

3. श्वेतकेतुः कतिवर्षः यावत् अध्ययनं कृतवान् ?

Unit 12.indd 69 06-06-2018 15:26:26

4. श्वेतकेतुः गुरोः सकाशे कान् अधीतवान् ?

5. अध्ययनात् परं श्वेतकेतुः स्वं कथं मन्यमानः आसीत् ?

6. श्वेतकेतुः फले किं पश्यति ?

7. वृक्षः कस्मात् समुत्पन्नः विद्यते?

8. इदं जगत् कस्मात् उद्भूतः भवति ?

VI. विस्तरेण उत्तरं लिखत ।

1. आरुणिश्वेतकेतोश्च संभाषणं यथाग्रन्थं लिखत।

.....

पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अच् सन्धिः-

सूत्रम् - अकः सवर्णे दीर्घः। अकः सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घः एकादेशः स्यात्।

(i) अ / आ + अ / आ = आ

(ii) इ / ई + इ / ई = ई

(iii) उ / ऊ + उ / ऊ = ऊ

(iv) ऋ / ॠ + ऋ / ॠ = ॠ

पदम्	पूर्ववर्णः	परवर्णः	विकारः	रूपम्
अत्र + अपि	अ	अ	आ	अत्रापि
रमा + आश्रयः	आ	आ	आ	रमाश्रयः
देव + आलयः	अ	आ	आ	देवालयः
तदा + अपि	आ	अ	आ	तदापि
गिरि + इन्द्रः	इ	इ	ई	गिरीन्द्रः
लक्ष्मी + ईशः	ई	ई	ई	लक्ष्मीशः
गुरु + उदयः	उ	उ	ऊ	गुरूदयः
वधू + ऊर्मिः	ऊ	ऊ	ऊ	वधूर्मिः
पितृ + ऋणम्	ऋ	ऋ	ॠ	पितॄणम्

Unit 12.indd 70 06-06-2018 15:26:26



व्याकरणम् - 6

धातुः – आत्मनेपदी – लृट् लकारः

1. एध्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	एधिष्यते	एधिष्येते	एधिष्यन्ते
मध्यमपुरुषः	एधिष्यसे	एधिष्येथे	एधिष्यध्वे
उत्तमपुरुषः	एधिष्ये	एधिष्यावहे	एधिष्यामहे

2. वन्द्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	वन्दिष्यते	वन्दिष्येते	वन्दिष्यन्ते
मध्यमपुरुषः	वन्दिष्यसे	वन्दिष्येथे	वन्दिष्यध्वे
उत्तमपुरुषः	वन्दिष्ये	वन्दिष्यावहे	वन्दिष्यामहे

3. लभ्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	लप्स्यते	लप्स्येते	लप्स्यन्ते
मध्यमपुरुषः	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उत्तमपुरुषः	लप्स्ये	लप्स्यावहे	लप्स्यामहे

Unit 12.indd 71 06-06-2018 15:26:26

4. रम्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रंस्यते	रंस्येते	रंस्यन्ते
मध्यमपुरुषः	रंस्यसे	रंस्येथे	रंस्यध्वे
उत्तमपुरुषः	रंस्ये	रंस्यावहे	रंस्यामहे

5. यत्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	यतिष्यते	यतिष्येते	यतिष्यन्ते
मध्यमपुरुषः	यतिष्यसे	यतिष्येथे	यतिष्यध्वे
उत्तमपुरुषः	यतिष्ये	यतिष्यावहे	यतिष्यामहे

6. मुद्			
पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	मोदिष्यते	मोदिष्येते	मोदिष्यन्ते
मध्यमपुरुषः	मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे
उत्तमपुरुषः	मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे

Unit 12.indd 72 06-06-2018 15:26:26

संस्कृतरञ्जनी - Class IX
List of Authors and Reviewers

Chair Person

Dr. **R. Thiagarajan,** M.A, Ph.D.,

Former Prof. of P.G & Research Dept. of Sanskrit, Presidency College, Chennai – 5

Reviewer

Dr. **V. Mohan,** M.A, Ph.D.

Asst. Director, CPR Institute of Indological Research Centre, Alwarpet, Chennai – 18.

Authors

S. Muthukumaraswamy, Siromani, M.A., M.Phil., B.Ed.

Sanskrit Pandit, Sri Ahobila Math Oriental Hr.Sec. School, Chennai-33.

V. Sriram, Siromani, M.A., M.Phil., B.Ed.
Sanskrit Pandit, Sri Ahobila Math Oriental Hr.Sec. School, Chennai-33.

Text Book Writing

Indological Research Institute, CPR Foundation, Alwarpet, Chennai-18.

Co-ordinator

K.Chandrasekaran
Lecturer, DIET, Chennai-5

Art and Design Team

Chief Co-ordinator and Creative Head

Srinivasan Natarajan

Layout

Thy designer

In-House

Gopu Rasuvel

Manohar Rathakrishnan

Ragupathy, Jerald Wilson

Cover Design

Kathir Arumugam

Co-ordination

Ramesh Munisamy

Typist

Shanthi

This book has been printed on 80 G.S.M. Elegant Maplitho paper.

Printed by offset at:

IX_ACKNOWLEDGEMENT.indd 73 27-06-2018 11:48:47

NOTES

NOTES

NOTES